नेपालसम्राट्श्री ५ महाराजाधिराज-
पृथ्वीनारायणशाहदेवविरचिता

व्रतरत्न-माला

[दिव्यप्रभासंवलिता]

टीकाकारः
महामहोपाध्यायजयमङ्गलसूरिशिष्यो
लक्ष्मणभट्टाचार्यः

सम्पादकः
बुद्धिसागरपराजुलिः

प्रकाशकः
नेपालराष्ट्रियाभिलेखालयः

व्रतरत्नमाला

VRATARATNAMALA

रचयिता

श्री ५ महाराजाधिराजः पृथ्वीनारायणशाहदेवः

Composed by

His Majesty king Prithwinarayana shahadeva

टीकाकारः

महामहोपाध्यायः जयमङ्गलसूरिशिष्यो लक्ष्मणभट्टाचार्यः

Commentator

Laxmana Bhattacharya

सम्पादकः

बुद्धिसागरः पराजुलिः

Editor

Buddhisagar Parajuli

पुरातत्व प्रकाशनमाला-६८

प्रकाशक —
श्री ५ को सरकार
पुरातत्व विभाग
नेपाल राष्ट्रिय अभिलेखालय
रामशाहपथ, काठमाडौं ।

२०३१ सालमा पहिलो पटक १००० प्रति

मूल्य

मुद्रक —
लुष प्रेस
पुल्चोक, ललितपुर
नेपाल ।

समर्पणम्

श्री ५ वर्षिष्ठमहाराजाधिराजपृथ्वीनारायणशाहदेवानां
दिव्यात्मपरितुष्ट्यै

'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये'

इति

सादरं समर्पयति

बुद्धिसागरः

श्री ५ महाराजाधिराजः पृथ्वीनारायणशाहदेवः



(१७७९-१८३१ वि. सं.)

विभागीय मन्तव्य

युगनिर्माता श्री ५ बडामहाराजाधिराज पृथ्वीनारायण शाहको प्रस्तुत रचनाले मौसूफको प्रतिभा र दिव्य व्यक्तित्वको अर्को एक महत्वपूर्ण पक्ष दृष्टिगत हुन्छ। राष्ट्रिय एकताको मूलभूत सिद्धान्तमा मौसूफको असीम आस्था थियो, तसर्थ राजनीति झैं मौसूफको धर्मनीति पनि विवेकपूर्ण थियो। 'व्रतरत्न माला' नामक यस पुस्तकमा हाम्रा चाडपर्वहरूको राम्रो विवेचना गरिएको छ। धार्मिक क्षेत्रका निम्ति यसको महत्व स्वत:सिद्ध छ भने अनुसन्धानका दृष्टिबाट पनि यस ग्रन्थको कम महत्व छैन। राष्ट्रनिर्माताको यस रचनालाई प्रकाशनमा ल्याएकोमा राष्ट्रिय अभिलेखालयलाई र निकै परिश्रमपूर्वक सम्पादन गर्नु भएकोमा प्र. अ. अ. श्री बुद्धिसागर पराजुलीलाई हार्दिक धन्यवाद छ।

रमेशजंग थापा
निर्देशक
शि. मं. पुरातत्व विभाग

प्राक्कथन

यो नेपाल अधिराज्य विभिन्न मत, विभिन्न जात, विभिन्न शास्त्रीय संप्रदाय, विभिन्न आचार विचार एवं विभिन्न राज्य-हरूको एकीकरणद्वारा संपन्न भएको हो । यो एकीकरणको श्री-गणेश गर्ने महापुरुष श्री ५ बडा महाराजाधिराज पृथ्वीनारायण शाह हुन् । यिनले यसै काममा आफ्नो सारा जीवन सर्मपण गरे । यिनले यो स्तुत्य सफल प्रयास नगरिदिएको भए सारा भारतभर अथवा पूर्वमा अष्ट्रेलिया सम्मको साम्राज्य खडा गर्न सफल भएका साम्राज्य विस्तारवादी अंग्रेजहरूका मूठी-भित्र यो प्रदेश पनि अवश्यै पर्ने थियो र आज संयुक्त राष्ट्र संघमा यसको झण्डा फर्फराउने सम्भावना नै हुँदैनथ्यो । तसर्थ आजको नेपाल साँच्चै भनौं भने श्री ५ पृथ्वीनारायण शाहको नेपाल हो र उनकै वंशज एवं भारदारहरूका ममताको प्रतीक हो तथा कलेजाको टुक्रा हो, नेपालीमात्रको गौरवको चरम सीमा हो । यस कुरामा इतिहास साक्षी छ र कुनै किसिमको संशय पनि छैन ।

इतिहास हेर्दा नेपालका समान अवस्थाका जति राष्ट्र-हरू थिए ती आज चन्द्रलोकमा पुगे, तर नेपाल विवश छ आफ्नै नेपालमा राम्ररी उभिन पनि आज अरूको सहयोगको अपेक्षा राख्नुपरेको छ यस कुराको चस्को नेपालीको मुटुमा राम्ररी परिदियो भने यो जाति पुनः जागरूक हुने नै छ ।

राष्ट्रको अखण्डताका लागि भाषाको देन निकै महत्वपूर्ण हुन्छ, त्यसबारे नेपाली भाषाको आत्मगत क्षमताले नै राष्ट्रिय

अखण्डतामा सघाउ गरिरहेकै छ र यो काम यसले पछिसम्म पनि चालु राख्ने नै छ भन्न सकिन्छ ।

राष्ट्रिय उच्च प्रतिभाको सहि मूल्याङ्कन गर्न सक्नु पनि राष्ट्रगत अखण्डताको रक्षाका लागि एक महान् वरदान हो र यस विषयमा पनि श्री ५ पृथ्वीनारायण शाह सचेष्ट रहेका देखिन्छन्, कारण उनी विद्वान्, वीर, वृद्ध तथा बुद्धिमान्हरूको संमान गर्दथे र उद्दण्ड व्यक्तिको मानमर्दन गर्न पनि उनी प्रवीण थिए ।

बुद्धिमान् एवं विद्वान्लाई केही समयसम्म वलप्रयोग गरी थिचोमिचो गरे पनि वास्तवमा उनीहरूप्रति विजय यस प्रकारको वलमिच्याईले सम्भव छैन र उनीहरूको सहानुभूति राष्ट्रनिर्माणका लागि वरदान हो र मूर्खको झुण्डलाई साथ लिएर गरेको काम दिगो हुन्न भन्ने कुरा पनि उनले राम्ररी जानेका थिए, साथै उनको आफ्नो यस्तो प्रतिभा थियो कि भीष्मले शान्तिपर्व महाभारतमा धर्मराज युधिष्ठिरलाई अराए सिकाएका धर्मनीति आपत्कालीन धर्म एवं नीति जस्ता गम्भीर राजनीति उनका हृदयमा स्वयं उचित समयमा प्रस्फुटित हुन्थे । यसै कारणले उनी समस्त नेपालीका मनोमय सिंहासनमा विराजमान हुन सफल भएका थिए ।

उनलाई आफ्नो समयमा मिलेको सफलता आफ्ना उत्तराधिकारीहरूलाई मिलोस् भन्ने अभिलाषा पनि अवश्य थियो र समसामयिक राजाहरूका विफलताको कारण पनि उनलाई थाहा थियो । यसै कारण बरु उनले भाइ–भतिजाको परित्याग गरे तर राष्ट्रिय एकता एवं अखण्डताको ढुंगामा खलल पर्ने खालका माया ममतामा लागेनन् ।

हामी नेपालीहरूमा मात्र हैन भारतमा पनि शास्त्रीय गम्भीर अध्ययन गर्न काशीमा जाने रीति थियो र काशीबाट सद्गुणका साथै दुर्गुण पनि बोकी ल्याउने कुरा स्वभावसिद्ध थियो,

यसबाट आफ्ना देशका बूढा पाका परिपक्व विद्वान्हरूप्रति रहेको विश्वास एवं श्रद्धालाई मलिन गराई स्वार्थसिद्धि गर्न चाहने पण्डितम्मन्यहरूद्वारा अप्रत्यक्ष रूपमा धार्मिक एवं सांस्कृतिक दुर्गको सिर्जना गरी राष्ट्रिय एकतामा आउन सक्ने संभावित आँचको कल्पना गरी त्यसको निराकरणार्थ श्री ५ बडा महाराजाधिराज पृथ्वीनारायण शाहले धर्मशास्त्रका आदरणीय कतिपय ग्रन्थ–हरूको परिशीलन गरी यो 'व्रतरत्नमाला' भन्ने सानो १८५ श्लोकको निर्णय ग्रन्थ लेखेर नेपाली मात्रमा धार्मिक एवं सांस्कृतिक अखण्डता कायम गराइदिएको कुरा पितापुर्खाका जनअनुश्रुति अनुसार मैले सुनेको थिएँ। श्री ५ पृथ्वीनारायण-शाहका साथ नुवाकोट विजयको यात्रामा सहभागी भई आउने पं. राजीवलोचन पराजुलीको प्रयासले यसको १ प्रति पोखरामा यस अक्षरका लेखकका घरमा पनि सुरक्षित थियो । यो लेखक काशीमा अध्ययनार्थ बसेका वेलामा वि. सं. १९९२-२००३ साल सम्मको लामो अवधिमा घरमा रहेका धेरै हस्तलिखित पुस्तकहरू हिनामिना हुँदा यो पुस्तक पनि परेछ तर खोजी गर्दा १ पत्र मात्र फेला पऱ्यो। पछि कालचक्रको घटनाले यी अक्षरका लेखकलाई वीर पुस्तकालयमा काम गर्नु पर्ने स्थिति भयो ।

व्याकरणाचार्य पं. टेकनाथ पौडेलज्यू समेतका गुरुजनले पुस्तकालयमा काम गर्ने साबिकका विद्वान्हरूलाई कुमारीचोकको बही बुझाउनुपर्ने झमेलाबाट दुःख पाएको कुरा देख्नुभएको हुनाले मलाई पनि पुस्तकालयमा प्रवेश गर्न ठीक छैन भन्ने सल्लाह दिनुभएको थियो तर मेरा पूज्य गुरु स्व० पं. बालबोध मिश्रज्यूका पनि गुरु काशीका सर्वमान्य नेपाली विद्वान् परम गुरु पं. नीलदेव पन्तज्यूले पनि यसको विकासार्थ काम गर्नु भएको कुरा देखिन आएकाले आफ्ना परम गुरुको अभिलाषा पूर्ण गर्न र नेपालको गौरवपूर्ण संस्थानको उत्थान गरी राष्ट्रसेवा गर्न मैले त्यस वेला यस पुस्तकालयको सेवा गर्ने र यस काममा

आत्मसमर्पण गर्ने विश्वास गरें । पछि यो श्री ५ पृथ्वीनारायण शाहलिखित पुस्तक यहाँ छ कि भनी हेर्दा रहेनछ र काठमाण्डूमा कतै यो पुस्तक पाइन्छ कि भनी खोजी गर्दा प्राप्त भएकाले पं० अनङ्गनाथ पौडेल कुमारीगालका प्रयासमा यसको खरीद भएको हो ।

यो ग्रन्थ वसन्ततिलका छन्दमा रचिएको छ । उपलब्ध पुस्तकमा केही श्लोक खण्डित छन् । यसको टीका, जो महामहोपाध्याय जयमङ्गलशिष्य लक्ष्मण भट्टाचार्यले लेखेका छन्, त्यसका आधारमा पूर्ति गर्न सकिएको छ । लिपिकारको परम्परागत त्रुटिले गर्दा यसको संपादन तथा प्रकाशन गर्ने विचार हुँदा हुँदै पनि संपादनको काम गर्न निकै कठिनाई पर्न गयो । मूल आदर्श पुस्तक १ प्रति मात्र, त्यो अशुद्ध, कतै अर्को प्रति पाइन्छ कि भन्ने आशाले खोजमा लागियो कहीं पाउन सकिएन र समान विषयका अरू धर्मशास्त्रका ग्रन्थहरूको समेत परिशीलन गरी यसको संपादन एवं संशोधन गरिएको छ । टीकाको संदर्भ ग्रन्थगत संदर्भ र प्रसङ्गगत सन्दर्भका आधारमा यथासंभव त्रुटीको परिमार्जन गरी गराई छापिएको छ ।

ग्रन्थको रचनामा भने जस्तो प्राञ्जलता छैन तापनि श्री ५ पृथ्वी जस्ता राष्ट्रनिर्माणमा नित्य व्यस्त रहनुपर्ने व्यक्तिबाट यस प्रकारको सुश्रृङ्खल संदर्भको रचना हुनु ज्यादै ठूलो कुरा हो । टीका शब्दार्थ गर्नका लागि र केही शास्त्रीय प्रमाण प्रस्तुत गर्न प्रयत्नशील रहेको छ । गौरवको कुरा हो कि हाम्रा शाही राजाहरू संस्कृत वाङ्मयका हिमायती थिए र केही ग्रन्थ लेख्न पनि सफल प्रयास गर्दथे । जस्तै श्री ५ द्रव्यशाहको 'चमत्कार-मञ्जरी' छ । श्री ५ पृथ्वीनारायणशाहको यही 'व्रतरत्नमाला' भयो । श्री ५ प्रतापसिंह शाहको ग्रन्थ 'पुरश्चर्यार्णव' जो प्रकाशमा २ पटक आयो । श्री ५ गीर्वाणयुद्ध विक्रम शाहको ग्रन्थ 'सत्कर्म-रत्नावली' जो प्रधानाचार्य पं. रामनाथ आचार्य र प्राचार्य

दामोदर कोइरालावाट सम्पादित भई प्रकाशमा आएको छ। श्री ५ राजेन्द्रको कृति 'राजकल्पद्रुम' एवं 'श्रीस्तोत्रव्याख्या' २ ग्रन्थ राष्ट्रिय अभिलेखालयमा प्राप्त छन्। यसरी शाह वंशका राजाहरूले आफ्नो संस्कृतप्रतिको ममता ग्रन्थको रूपमा प्रकाशित गरेका छन्। शाही राजाहरूले मूर्खको कुण्डको मात्र भर गरेको भए यो काम सम्भव हुने थिएन। 'पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारक' भन्ने कुरामा शाही राजाहरू आश्वस्त थिए।

यस 'व्रतरत्नमाला' मा प्रतिपादन हुने विषयहरू—

यस प्रकार यस ग्रन्थमा मुख्य विषयको निर्णयका साथै हाम्रा नेपालीहरूका परस्परागत विशेष पर्वहरू एकादशी, जनैपूर्णिमा, जन्माष्टमी, दशैं, तिहार, वैशाख, कार्तिक, माघ, शिवरात्री, होली, ग्रहण, संक्रान्तिको विशेष रूपमा विचार गरिएको छ। यसमा कहीं व्याख्यान गर्दा टीकाकार आफ्नो वाटो बिराउँछन्।

जस्तैः १६७ संख्याको श्लोक व्याख्यान गर्दा—

"सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा।
तत्र स्नानं न कुर्वीत दद्यादानं च न क्वचित्॥

इति वचनात् । दृष्टोऽरिष्टप्रदो राहुरिति वचनात् । तेन मेघाच्छादने अन्धादेश्च न स्नानाधिकारः" भन्न पुग्दछन् । वास्तवमा धर्मशास्त्रहरूको राम्ररी समीक्षा गर्दा "दृष्टोऽरिष्टप्रदो राहुः" यसको अर्थ ज्यौतिष शास्त्र अनुसार जुनजुन राशिका मान्छेलाई ग्रहण अरिष्ट मानिएको छ उनीहरूले हेरे भने अरिष्ट हुन्छ, तसर्थ त्यस्ताले नहेर्नू भनी लेख्नुपर्नेमा बादल लागेर ग्रहण नदेखिएमा र आँखा नदेख्ने अन्धाले पनि ग्रहण निमित्तक स्नानदानादि गर्न पर्दैन भनेका छन् । जुन कुरा धर्मशास्त्रका प्रामाणिक अरू निबन्धसँग र यहीं प्रस्तुत गरेको "सूर्यग्रहो यदा रात्रौ" यो श्लोकको मन्तव्यार्थसँग समेत मेल खाँदैन । हुनसक्छ यो कुरा 'सुनी सूतक देखी ग्रहण' भन्ने जनसाधारणको बालिश अनुश्रुतिका भरमा टीकाकारले विचार व्यक्त गरेका होलान् । जे होस् यो संदर्भ सुन्दर छ र हाम्रो देशका लागि गौरवको विषय पनि हो । धर्मशास्त्रमा मतभिन्नता हुनु सामान्य कुरा हो तापनि नेपालीका लागि यो माननीय कुरा हो । संशोधनमा संभव छ मानवस्वभावसिद्ध त्रुटी छन् । विद्वान्हरूले विचार गर्नुभई सप्रमाण सुझाव दिनुभएमा द्वितीय संस्करणमा सच्याइनेछ । आदर्श पुस्तक करीब करीब एक मात्र हुँदा सम्पादनमा निकै गाह्रो पर्नु स्वाभाविकै हो । 'अकरणान्मन्दकरणं श्रेयः' भनी **श्री ५ महाराजाधिराज वीरेन्द्र वीर विक्रम शाहदेवको** शुभराज्याभिषेकको हर्षोल्लासपूर्ण शुभ अवसरको उपलक्ष्यमा प्रकाशनमा ल्याएको छु ।

रचनासमय

श्री ५ बडामहाराजाधिराज पृथ्वीनारायण शाहले काठमाडौं उपत्यका लगायत लगभग तनहुँदेखि सिक्किमसम्मको विशाल नेपाली भूखण्डलाई नेपाल अधिराज्यको रूपमा एकीकरण गरिसकेपछि यस ग्रन्थको रचना भएको कुरा ग्रन्थको

प्रथम श्लोकबाट र दिव्यप्रभा टीकाको समाप्तिको पुष्पिकाबाट समेत स्पष्ट हुन्छ ।

वि. सं. १८२५ मा काठमाडौं उपत्यका विजय भएको र वि. सं. १८३२ मा श्री ५ पृथ्वीनारायण शाहको स्वर्गारोहण भएकाले वि. सं. १८२५–१८३२ भित्र यस ग्रन्थको रचना भएको कुरा स्पष्ट हुन्छ । यो ग्रन्थ श्री ५ पृथ्वीनारायण शाह-लाई उपदेशक र श्री ५ युवराज प्रतापसिंहलाई उपदेशको पात्र बनाई प्रस्तुत गरिएको छ । अर्थात् बाबु छोराको सम्वन्धमा वाबुले छोरालाई अर्ती दिएको रूपमा लेखिएको छ ।

संस्कृत व्याकरण अनुसार रङ्ग, भङ्ग, अङ्ग जस्ता शब्द शुद्ध हुन्छन्, रंग, भंग, अंग जस्ता शब्दहरू अशुद्ध मानिन्छन् तापनि अक्षरका अभावमा यस्ता केही अशुद्ध शब्दले यसमा स्थान पाएका छन् । सिता स्वहिताय यसरी पदच्छेद गरी छापिनु पर्नेमा सितास्वहिताय यस्तो पदच्छेद नगरी छापिएको र कहीं उपोषणविशेषफला यस्तो एकै पद हुनुपर्नेमा उपोषण विशेषणफला यस्तो हुन गएको छ । यस किसिमको मुद्रण सम्बन्धी सामान्य अशुद्धिहरू छन् तापनि यो ग्रन्थ विद्वज्जनोपयोगी हुनाले विद्वान्हरूले यस्ता भूललाई सच्याई पढ्नुहुन्यै छ । जन-साधारणको उपयोगको लागि र सस्कृतका अनभिज्ञ विशिष्ट विद्वान्का लागि यसको मूलमात्रको नेपाली अनुवाद सहित अर्कै पुस्तक छाप्ने विचार गरिएको छ ।

संस्कृत वाङ्मयमा प्रवेशै नभएका अक्षर संयोजक भएका छापाखानाबाट यसको प्रकाशनमा धेरै परिश्रम गर्नु पर्ने भएकाले संस्कृत वाङ्मयमा राम्रो प्रवेश भएका कर्मचारीबाट सञ्चालित ल. पु. पुलचोकस्थित लुष प्रेसलाई यो पुस्तक छाप्न अनुरोध गरिएको हो र यसको अक्षर–योजना संशोधन एवं तत्परताका साथ काम गरिदिनुभएकोमा सामनाथ पौडेलजी र उहाँका भाइ-

हरू त्यस कामका लागि सदा अविस्मरणीय हुनुहुन्छ । यसका मूल भागको संशोधनमा भाग लिनुहुने सहयोगी पं० कृष्णप्रसाद भट्टराईजीलाई पनि बिर्सन सक्तिन । यसको प्रकाशनमा धेरै जमर्का भए प्रेसमा कापी पुगे वापस आए । बल्ल–तल्ल दुःखले यसको प्रकाशन हुनसकेको छ । यसरी संशोधन र संपादन गर्दा भ्रम, करणापाटव अज्ञान आदि दोष मानवकै हुन् तसर्थ त्रुटिप्रति 'तत्सन्तः क्षन्तुमर्हन्ति' भनी क्षमायाचना गर्दै यो कलम यहीं विसाउँछु ।

सज्जनहरूको पाउको धूलो

राष्ट्रिय अभिलेखालय
काठमाडौं

बुद्धिसागर पराजुली
०३०–३–२६

व्रतरत्न-माला

व्रतरत्नमाला

जित्वा बलेन करदीकृतसर्वराजः
सिंहासनोपरि निविश्य विराजमानः ।
आसीनमन्ति पुरतोऽवनिपालपृथ्वी-
नारायणः सुतमुवाच हिताय वाचः ।।१।।

।। श्रीगणेशाय नमः ।।

विघ्नराजं नमस्कृत्य विघ्नविध्वंसहेतवे ।
दिव्यप्रभेयमेतस्यास्तन्यते विदुषां मुदे ।।

तत्र तावत्स्वभुजविक्रमवशीकृतराजमण्डलः पृथ्वीनारायणो राजा किं चकारेत्यत आह– जित्वेति । अवनिपालपृथ्वीनारायणः पृथ्व्यां नारायणः पृथ्वीनारायणः विष्णोः कलयावतीर्णो विष्णुरेवायमित्यर्थः । भूदेववत्समासः यद्वा पृथ्वेव नारा आपस्ता अयनं स्थानं यस्य स तथा आपो नारा इति स्मृतेः अवनिं पालयतीति तथा स चासौ स च अवनिपालः पृथ्वीनारायणः राजकुलश्रेष्ठ इत्यर्थः पुरतोग्रतः अन्ति अन्तिके आसीनं सुतं पुत्रं हिताय वाचो गिर उवाच उक्तवान् । कथंभूतः वलेन स्वपौरुषेण जित्वा करं ददतीति करदाः अकरदाः करदाः कृताः करदीकृताः तथा सर्वे राजानो येन सः 'राजाहसखिभ्यष्टच्' तथा करदीकृतसर्वराजः

पुनः किंभूतः सिंहासनस्योपरि निविश्य विराजमानः शोभमानः यावत् क्षत्रियधर्मं विधाय स्वस्थचित्तः सन्नित्यर्थः; अस्मिन् ग्रन्थे वसन्ततिलकावृत्तं यावत्समाप्तिः ।।१।।

स्मृत्वा समाहितमतिर्हृदयारविन्दे
पादारविन्दयुगलं नम हैमवत्याः ।
भूषार्थमात्मज मयाद्य विधीयमानां
कण्ठे निधाय विहर व्रतरत्नमालाम् ।।२।।

ग्रन्थारम्भे निर्विघ्नपरिसमाप्तये मङ्गलमाचरणीयमिति शिष्टाचारान्नमस्कारात्मकमङ्गलपूर्वकं पुत्रायोपदिशति स्मृत्वेति। आत्मज हे पुत्र ! समाहिता मतिर्येन स तथाविधः सन् हृदयारविन्दे स्वहृत्सरोजे हैमवत्याः पार्वत्याः पादारविन्दयुगलं पादपद्मद्वयं स्मृत्वा नम नमस्कुरु पुनः भूषार्थम् अद्येदानीं मया विधीयमानां विरच्यमानां अन्यत्र ग्रथ्यमानां व्रतान्येव रत्नानि तेषामिमां मालां कण्ठे निधाय कण्ठान्तश्छिद्रान्मनसि निधाय अन्यत्र कण्ठदेशाद्वक्ष्यस्यवलम्बितां विधाय विहर क्रीड यथासुखं रमस्वेत्यर्थः । रत्नानां मालया विना कण्ठे शोभा नास्तीति भावः ।।२।।

शुद्धाग्रतः परदिनेऽपि सतीह काऽपि
नष्टापि कापि सफलादियुतां व्रताय ।
कापीष्टकालमनुपेतवती च दृष्टा
कापीक्ष्यतेऽनुदयगापि तिथिः फलाढ्या ।।३।।

तयास्तूच्यतामित्युक्तमाकर्ण्य राजाह शुद्धेति। कापि तिथिः अग्रतः शुद्धा अरुणोदयादिवेधरहिता सती परदिनेपि सती लवाद्यात्मिकतया विद्यमाना सेव सफला भवति एकादश्यादिवत् कापि

तिथिः नष्टा क्षयं गताऽपि पूर्वतिथिविद्धापि सती वृताय फलदा भवति जन्माष्टम्यादिवत् कापि तिथिः इष्टकालं कर्मकालं, अनुपेतवती, अव्याप्तवती सती सैव फलदा दृष्टा तृतीयादिवत् कापि तिथिः अनुदयगापि दण्डचतुष्टयानन्तरं विद्यमानापि सैव फलाढ्या ईक्ष्यते दृश्यते वरदचतुर्थ्यादिवत् ॥३॥

अन्त्येषु या फलवती सुत सापराढ्या
याद्येषु सा भवति सर्वमते सपूर्वा ।
पूर्वं विचार्य तिथिषु वृतमाचरन्ति
प्राज्ञा भजन्ति हृदि नैव हि संशयाधिम् ॥४॥

अन्त्येष्विति । सुत हे पुत्र या तिथि अन्त्येषु दण्डेषु परदले फलवती भवति सापरया तिथ्या आढ्यायुक्तेत्युच्यते । या तिथि आद्येषु पूर्वदलेषु फलाढ्या भवति सा सर्वेषां मतेपि सा पूर्वा पूर्वया युतेत्युच्यते एवं अमुना प्रकारेण सर्वासु तिथिषु विचार्य प्राज्ञा वुद्धिमन्तो व्रतमाचरन्ति कुर्वन्ति हि यस्मात् हृदि मनसि संशयाधि संशयव्यथां नैव भजन्ति तथा त्वमप्येवं विचार्य व्रतं कुर्वीति भावः ॥ ४ ॥

पूर्वापराप्युदयगा यदि वा न वापि
पूर्वैव सा परत एव यदापरैव ।
अभ्यंगमाचर भयान्नरकस्य सूनो
संवत्सराररिपि सैव मधौ सिताद्याः॥५॥

अथ प्रतिपन्निर्णीयते पूर्वैति सूनो हे तात मधौ चैत्रशुक्ल प्रतिपत् पूर्वापरापि पूर्वेद्युः परेद्युरपि उदयगा उदयकालव्यापिनी यदि स्यात् अथवा द्वयोरपि न स्यात् तदा पूर्वैव पूर्वान्वितैव

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ।।

इति हेमाद्रौ ब्राह्मे उदयकाले सृष्ट्युक्त्वात् चैत्रसितप्रतिपदि बालार्कोदये सर्वशेषः उदयद्वितये पूर्वोनुदययुगलेपि पूर्वःस्यात् यस्मात् चैत्रसितादेरुदयाद्भानोः प्रवृत्तिरब्दादेरिति ज्योतिर्निबन्धे दृष्टाच्च–

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ।।

इति वृद्धवसिष्ठोक्तेश्च यदा परतः परदिन एवोदयः तस्या तदा परैव परान्वितैव सूर्योदये सतीति वचनात् पूर्वदिने उदयकाल-व्यापित्वाभावात् इयं केत्यत आह सा संवत्सरादि अपिशब्दाद् वसन्तादिश्च ब्रह्मा ससर्जेत्यादि वचनात् तस्यां किंकर्तव्यमित्यत आह नरकस्य भयादभ्यंगमाचर तैलाभ्यंगं कुरु ।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत ।।

इति वृद्धवशिष्ठोक्तेः एवपदं मलमासयातेपि सैव नोत्तरेति सूचयति शुक्लादेर्मलमासस्य सोन्तर्भवति चोत्तर इत्यादिवचनात् अग्रिमवर्षातः पातालमलमासमारभ्यैव वर्षप्रवृत्तेः एतेन शुक्रास्तादिरपि निरस्तः ।। ५ ।।

तृप्यन्तु मे पितर इत्यभिलाषयुक्तो
यच्छ प्रपाममलशीतलजीवनाढ्याम् ।
यद्वान्वहं घटमिहोत्सृज मासमेकं
पारं गमिष्यसि सुताशु मनोरथस्य ।।६।।

अन्यत्किं कर्तव्यमित्यत आह तृप्यन्त्विति । सुत हे तात मे मम पितरस्तृप्यन्तु इति अभिलाषयुक्तः साभिलाषः सन् अमल-शीतलजीवनाढ्यां निर्मलहिमजलान्वितां प्रपां सर्वेभ्यो यच्छ वितर

अतीते फाल्गुने मासि चैत्रे प्राप्ते महोत्सवे ।
पुण्ये विप्रर्षिकथिते प्रपादानं समारभेत् ।।

इत्यपरार्के भविष्योक्तेः

अस्याः प्रदानात्तृप्यन्तु पितरः सपितामहाः ।
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ।।

इति तत्रैवोक्तेः असक्तौ किं कर्तव्यमित्यत आह एकं मासं मासपर्यन्तं इह प्रतिपदि आरभ्य निर्मलजल–पूर्णं घटं इह, अन्वहं उत्सृज ।

प्रपां दातुमशक्तेन विशेषाद्धर्ममिप्सुना ।
प्रत्यहं धर्मघटको वस्त्र-संवेष्टिताननः ।।
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ।

इति मंत्रश्च ।

एष धर्मघटो दत्तो ब्रह्म–विष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ।।

इति किंफलमित्यत आह आशु शीघ्रं मनोरथस्य पारं गमिष्यसि ।

अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोपि प्राप्नोतीह न संशयम् ।।

इति तत्रैवोक्तेः ।।६।।

कार्येयमात्मज हिमाचलकन्यकायाः
पूजाविधौ विधियुतैव मुहूर्त्तगापि ।
नैषीसिता यदि परत्र मुहूर्त्तगापि
पूर्वाद्यपादरहिता खलु सापराह्णा ।।७।।

कार्येति आत्मज हे तात हिमाचलकन्यकाया दुर्गायाः पूजाविधौ तु मुहूर्त्तगापि मुहूर्त्तमात्रापि विधियुतैव विधिर्ब्रह्मा

तत्तिथिर्द्वितीया तथैव युक्ता कार्या अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने मुहूर्त्तमात्रा कर्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात् नेति यदि ऐसीषिता आश्विनशुक्लप्रतिपत् परत्र परदिने मुहूर्त्तव्यापिन्यपि न भवति तदा आद्यपादरहिता गतषोडशघटिका सती पूर्वा कार्या,

आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ।
अपराह्णे च कर्तव्यं शुद्धसन्ततिकांक्षिभिः ।।

अतएव सापराह्णा अपराह्णव्यापिनी ग्राह्या खलु अन्यथा तु

अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम ।
मुहूर्त्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ।।

इति देवीपुराणात्,

आद्याः षोडशनाडीश्चात्यक्त्वा यः कुरुते मम ।
कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम् ।।

इति वचनात् ।

यो मां पूजयते नित्यं द्वितीयादिगुणान्वितम् ।
प्रतिपच्छारदीं ज्ञात्वा शोश्नूते सुखमुत्तमम् ।

इति देवीपुराणात् ।।७।।

तत्रोपवासमथवा व्रतमेकभक्तं
नक्तादि वा चर सुताद्रिसुताभितृप्त्यै ।
विप्रान् वृणुष्व पुनरध्ययनाय कुम्भं
संस्थापय त्वमथ भोजय कन्यकाश्च ।।८।।

तत्रेति सुत हे पुत्र तत्र प्रतिपदादौ उपवासमाचर कुरु अथवा एकभक्तव्रतं कुरु अथवा नक्तादि कुरु आदिशब्देनायाचितैकान्तरादि

कन्यासंस्थे रवौ शक्रशुक्लामारभ्य नन्दिकां ।
अयाची त्वथ वैकाशी नक्ताशी चाथ वाग्यतः ।।

इत्यादिवचनात् किंहेतोरित्यत आह अद्रिसुताभितृप्त्यै दुर्गातुष्टये पुनः किं कर्तव्यमित्यत आह पुनः अध्ययनाय चण्ड्यादिपाठाय विप्रान् वृणुष्व वरय

एवं चतुर्वेदविदो विप्रान्सर्वान्प्रसादयेत् ।
तेषां च वर्णं कार्यं च वेदपारायणाय वै ।।
एकोत्तराभिवृद्ध्या च नवमी यावदेव हि
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ।।

इत्यादिवचनात् पुनः कुम्भं संस्थापय ।
तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकं
सौवर्णं राजतं वापि ताम्रमृण्मयजं तव ।।

इति वचनात् त्वं कन्याश्च भोजय पूजयित्वा भोजयेत्यर्थः ।

एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तु वा ।।
नवभिर्लभते भूमिमैश्वर्यं (द्वित्रि) गेन तु ।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत् ।
कंचुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ।
नानाविधैर्भक्ष्यभोज्यैर्पूजयेत्पायसादिभिः ।
इत्यादि वचनात् ।।८।।

वाप्यायवाश्च बहुशः सुत वेदिकायां
पूज्या त्रिकालमगजा विविधोपचारैः ।।
भूषाम्बरैर्द्विजवराः सह कन्यकाभिः
सिध्यै मनोभिलषितस्य च तर्पणीयाः ।।९।।

पुनः किंकर्तव्यमित्यत आह वाप्या इति । वेदिकायां वेद्यां वहुश यवायवादय वाप्याः ।

शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा च वेदिकां
यवान्वै वापयेत्तत्र गोधूमैश्च सुसंयुतान् ।।

इत्यादिचनात् सुत हे पुत्र त्रिकालं विविधोपचारैः षोडशाद्युपचारै अगजा दुर्गा पूज्या त्रिकालमर्चयेद्देवीं जपस्तोत्रपरायणः इत्यादिवचनात् स्नानंमांगलिकं कृत्वा ततो देवीं प्रपूजयेदित्युक्तेश्च कन्यकाभिः सह द्विजवराअपि भूषांवरैः संतर्पणीया च किं हेतो मनोभिलषितस्य सिध्यै अभीष्टसिद्धये सोश्नुते सुखमुत्तमर्मिति वचनात् ।। ९ ।।

अस्यां विधेहि सुत संगवकालगायां
श्राद्धं च पिण्डरहितं जननीपितुस्ते ।
जीवत्पिताहमिति मास्तु तवेह शंका
श्रद्धाय कर्तुमुचितं सति मातुलेपि ।।१०।।

अस्यामिति सुत हे पुत्र अस्या प्रतिपदि संगवकालगायां तत्कालव्यापिन्यां सत्यां ते तव जननीपितुः मातामहस्य श्राद्धं मातुलेपि सति कुरु ।

जातमात्रोपि दौहित्रो विद्यमानेपि मातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ।।

इति हेमाद्रवचनात् ।

प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणां ।।
श्राद्धं मातामहं कुर्यात् सपिता संगवे सदा ।।

इति वचनात् अहं जीवत्पिता कथँ करिष्यामीति तव शंका इह मास्तु न भवतु पिण्डरहितं श्राद्धं श्रद्धाय कर्तुमुचितं जीवत्पितृणेति शेषः ।

मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वदा ।
न जीवत्पितृकः कुर्याद् गुर्भिणीपतिरेव च ।।
इति दक्षेण पिण्डमात्रनिषेधात् ।।१०।।

यस्मिन्दिने भवति कार्तिकशुक्लयाता
सायाह्नगा प्रतिपदात्मज तत्र गोर्चा ।
अह्नोर्द्वयोर्यदि तथास्ति तदा परस्मिन्
नोचेद्द्वयोरपि च पूर्वदिने प्रशस्ता ।।११।।

यस्मिन्निति । आत्मज हे पुत्र कार्तिकशुक्लयाता प्रतिपत् यस्मिन् दिने सायाह्नगा सायाह्नव्यापिनी भवति तदा परस्मिन् परदिने कार्या ।

वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते ।।

इति चेत् यदि द्वयोरह्नोरपि न भवति तदा पूर्वदिने प्रशस्ता भवति रात्रौ वलिपूजाविधानेन कर्मकालव्यापित्वात् परदिने चन्द्रोदये तन्निषेधात्–

गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमा ।
सोमो राजा पशून् हन्ति सुरभिः पूजकांस्तथा ।।
इति पुराणसमुच्चयात् ।।११।।

तस्यां प्रभातसमये गिरिमर्चयादौ
द्यूतं समाचर जयाय कुरुष्व गोर्चाम् ।
रात्रौ प्रपूजय बलिं त्वमथोत्तरस्यां
सायं विधेहि सुत मंगलमालिकां तु ।।१२।।

तस्यामिति । सुत हे तात तस्यां प्रतिपदि प्रभातसमये त्वम् आदौ गिरिं गोवर्द्धनं पूजय । ततस्तदनन्तरं जयाय द्यूतं

समाचर अक्षैः क्रीड । प्रातः गोवर्द्धनं पूज्य द्यूतं चापि समाचरेदिति वचनात् । तदनन्तरं गोर्चा गोपूजां कुरु । भूषणीयास्तदा गावः पूज्याश्चावाहदोहना इत्यादिवचनात् । तदनन्तरं रात्रौ बलिं पूजय ।

कृत्वैतत् सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ।
पूजां कुर्यान्नृपः साक्षाद् भूमौ मण्डलके शुभे ।।

इत्यादिवचनात् । अथानन्तरं मंगलमालिकां तु उत्तरस्यां परदिने सायंकाले विधेहि ।

लभ्यते यदि वा प्रातः पतिपद्घटिकाद्वयम् ।
तस्यां नीराजनं कार्यं सायं मंगलमालिका ।।

इति भविष्योक्तेः

कार्त्तिके शुक्लपक्षादौ अमावास्याघटीद्वयम् ।
देशभंगभयान्नैव कुर्यात् मंगलमालिकाम् ।।

इति देवीपुराणाच्च ।।१२।।

अन्याखिला सुत सिता किल सापराह्णा
पूर्वान्वितैव दिवसान्तमुपागतापि ।
कृष्णा तु नूनमखिला विधिनैव युक्ता
कूष्माण्डवृद्धि न कदापि सितासितासु ।।१३।।

अन्येति । सुत हे तात अन्या सिता शुक्ला प्रतिपत् सापराह्णा, अपराह्णव्यापिनी सती अखिलापि पूर्वान्वितैव कार्या ।

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी । इति स्कान्दोक्तेः । शुक्ला स्यात्प्रतिपत्तिथिः । प्रथमतश्चेत् सापराह्णे भवेदिति दीपिकोक्तेश्च कथंभूता दिवसान्तमुपागतापि सायाह्नव्यापिन्यपि किल तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति

माधवोक्तेः कृष्णाखिला प्रतिपत्तु विधिनैव युक्ता द्वितीययैवान्विता नूनं फलदेति शेषः । कृष्णातूत्तरतोखिलेति दीपिकोक्तेः एतासु सितासितासु प्रतिपत्सु कूष्माण्डं कदापि नाद्धि न भक्षय ।

कुष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा
तैलं चामलकं दिवं प्रवसता शीर्षं कपालान्त्रकम् ।
निष्पावांश्च मसूरिकाः फलमथो वृन्ताकसंज्ञं मधु
द्यूतं स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाषोडश ।।

इति मूहर्त्तदीपिकायामुक्तत्वात् ।।१३।।

आषाढमाससितपक्षगता द्वितीया
पूर्वाह्णगैव फलदास्ति रथोत्सवेषु ।
कार्या परापरत एव यदाथ पूर्वा
स्याद्वत्स पूर्वदिन एव यदा तु तर्हि ।।१४।।

अथ द्वितीया निर्णीयते । आषाढमाससितपक्षगता द्वितीया रथोत्सवेषु पूर्वाह्णगा पूर्वाह्णव्यापिन्येव फलदास्ति नेतरेत्यर्थः ।

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं वै भद्रया सह ।।
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान् वहून् ।
ऋक्षाभावे तिथौ कार्या यात्रा सा प्रीतये मम ।।

इति वचनात्

पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्तगाः ।
सा द्वितीया परोपोष्या पूर्वविद्धा ततोन्यथा ।।

इति माधवोक्तेः उभयत्र पूर्वाह्णव्याप्तौ तु परैव कार्या वचनं तु तदेवेति फलितार्थः ।।१४।।

पश्याम्बुजासनतिथावपराह्णगाया-
मिन्दोः कलां विमलखेश्वयुजः सितायाम् ।
ऊर्जे सितामपि तथैव यमद्वितीयां
पूर्वान्वितां सुत विधेहि यमार्चनादौ ॥१५॥

पश्येति । अश्वयुजः आश्विनस्य सितायां शुक्लायां द्वितीयायाम् अम्बुजासनतिथौ अपराह्णव्यापिन्यां सत्यामिन्दोः कलां पश्य कस्मिन्नित्यपेक्षायामाह । विमलखे निर्मलाकाशे सुत हे पुत्र ऊर्जे कार्तिके सितां शुक्लां यमद्वितीयामपि यमार्चनादौ आदिशब्देन यमतर्पणभोजनादिषु च तथा अपराह्णव्यापिनीं पूर्वान्वितां विधेहि ।

ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ॥
ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ।
वेष्टितः किन्नरैर्हृष्टस्तस्मै यच्छति वाञ्छितं ॥

तथा भविष्ये

प्रथमा श्रावणे मासि तथा भाद्रपदे परा ।
तृतीयाश्वयुजे मासि चतुर्थी कार्तिके भवेत् ॥
श्रावणे कलुषा नाम तथा भाद्रे च निर्मला ।
आश्विने प्रेतसंचारा कार्तिके याम्यकानना ॥

इत्युक्त्वा प्रथमायां व्रतं द्वितीयायां सरस्वतीपूजा तृतीयायां श्राद्धमुक्त्वा चतुर्थ्यामिदमुक्तं स्वपदं मध्याह्नव्यापिनी निषेधपरं ॥१५॥

स्नात्वार्चयात्मज परेतपतिं भगिन्या
भुङ्क्ष्वार्पितं त्यज वसून्यपराह्णकाले ।
हृद्यं फलिष्यति सुखेन भयं च मृत्योः
सर्वत्र नक्ष्यति सदा कृपया यमस्य ॥१६॥

स्नात्वेति । आत्मज हे पुत्र स्नात्वा अपराह्णकाले परेतपतिं **यमराजम्** अर्चय पूजय । अपराह्णेर्चयेद् यममिति वचनात् । **तदनन्तरं** भगिन्यार्पितं दत्तं **भुङ्क्ष्व** ।

यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ।
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ॥
अस्यां निजगृहे वत्स न भोक्तव्यं ततो नरैः ।
स्नेहेन भगिनीहस्ताद् भोक्तव्यं पुष्टिवर्द्धनम् ॥

इति वचनात् वसूनि त्यज भगिन्यै देहि ।

दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।
स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः ॥

इत्यादिवचनात् । किं फलमित्यत आह । **यमस्य कृपया सुखेन** हृद्यं हृदयप्रियं वस्तु फलिष्यति । च पुनः **सर्वत्र सर्वतः** सार्वविभक्तिकस्तसिः वृक्षारोहणादितः मृत्युर्भयं नंक्ष्यति ।

यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः प्रथितया स्वसृसौहृदेन ।
तस्यां स्वसुः करतलाद्यदि यो भुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥

इति वचनात् ॥१६॥

अन्याखिला सुत सिता तु परा द्वितीया
पौर्वाह्णिकी निगदिता फलदायिनीति ।
पूर्वैव या बहुलपक्षगताखिला सा-
नैतासु भक्षय कदाचन वार्हतानि ॥१७॥

अन्येति । सुत हे पुत्र अन्याखिला सिता शुक्ला द्वितीया तु पौर्वाह्णिकी पूर्वाह्णकालव्यापिनी सती परापरया युता फलदायिनीति निगदिता प्रोक्ता या बहुलपक्षगता कृष्णपक्षस्था सा

पूर्वैव पूर्वान्वितैव फलदायिनी कृष्णा द्वितीयादिमा पूर्वाह्णे यदि सा दिवा तु परतः सैवेति दीपिकोक्तेः एतासु सितासितासु द्वितीयासु वार्हतानि बृहतीफलानि कदाचन न भक्षय । कूष्माण्डे बृहती-फलानीति संग्रहश्लोकोक्तेः ॥१७॥

चैत्रे सिता तु परया सहिता तृतीया
कार्या सुत द्विघटिकापि हिताय सैव ।
तस्यां समर्च्य गिरिजां शितिकण्ठयुक्ता-
मान्दोलयाभिमतमाप्स्यसि मा चिरेण ॥१८॥

अथ तृतीया निर्णीयते । सुत हे तात चैत्रे सिता शुक्ला तृतीया तु द्विघटिकापि मुहूर्त्तमात्रापि परया सहिता सती सैव हिताय भवति मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः किं कर्तव्यमित्यत आहः तस्यां तृतीयायां शितिकण्ठयुक्तां महादेवयुतां गिरिजां गौरीं समर्च्य प्रपूज्यान्दोलय--

तृतीयायां यजेद्देवीं शङ्करेण समन्वितां ।
कुंकुमागुरुकर्पूरमणिवस्त्रसुगन्धकैः ॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः ।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा ॥

इति वचनात् । किं फलमित्यत आहः मा चिरेण अचिरा-दभिमतं आप्स्यसि लप्स्यसे ॥१८॥

राधे सितापि परया सहिता विधेया
पूर्वाह्णगा सुत दिनद्वितये स्थितापि ।
ब्रह्मर्क्षबोधनयुता विधितिथ्यविद्धा
सा दुर्लभाधिकफलाक्षयदा तृतीया ॥१९॥

राधे इति । सुत हे पुत्र राधे वैशाखे सिता शुक्ला तृतीयापि पूर्वाह्णगा पूर्वाह्णव्यापिनी सती परया सहिता विधेया किंभूता दिनद्वितये स्थितापि ।

वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युताथवा ॥
रोहिणीबुधयुक्तापि पूर्वविद्धा विवर्जिता ।
भक्त्या कृतापि मान्धातः पुण्यं हन्ति पुराकृतं ॥

गौरीविनायकोपेता रोहिणीबुधसंयुता ।
विनापि रोहिणीयुक्ता पुण्यकोटिप्रदा सदा ॥

इति नारदीयोक्तेः

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्ताच्च । अतएव ब्रह्मर्क्षबोधनयुता रोहिणी-नक्षत्रबुधवारयुता विधितिथ्यविद्धा द्वितीया वेधरहिता सा अक्षयदा अक्षयतृतीयाधिकफला भवति अत एव दुर्लभा विरलेतरा पूर्वोक्तिवचनात् ॥१९॥

स्नात्वा सुत द्युसरिति त्यज पापसंघं
होमं च कारय यवैर्हरिमर्चयैभिः।
तानेव देह्यवनिदेवकुलाय पश्चा-
त्त्वं चापि खादय कुरूदककुम्भदानम् ॥२०॥

स्नात्वेति । सुत हे पुत्र तस्यां तृतीयायां द्युसरिति गङ्गायां स्नात्वा पापसंघं पापसमूहं त्यज दूरीकुरु ।

वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ॥
गंगातोयैर्नरः स्नात्वा मुच्यते सर्वकिल्विषैः ॥

इति वचनात् च पुनः यवैर्होमं कारय एभिर्यवैर्हरिमर्चय पूजय अवनिदेवकुलाय ब्राह्मणेभ्यस्तानेव देहि । पश्चात्त्वं च तान् यवांस्तद्विकारान् खादय ।

तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान् दत्वा द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ।।

इति वचनात् उदककुंभदानं जलपूर्णघटदानं कुरु ।

उदकुंभान् सकनकान् सान्नान् सर्वरसैः सह ।
यवगोधूमचणकान् सक्तून् दध्योदनं तथा ।
ग्रैष्मिकं सर्वमेवान्नं सस्यदाने प्रशस्यते ।।

इति हेमाद्रौ भविष्योक्तेः ।

तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य च ।
उदकुम्भप्रदानेन शिवलोके महीयते ।।

इति देवीपुराणाच्च । मन्त्रस्तु–

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
यस्य प्रदानात्तृप्यन्तु पितरः सपितामहाः ।।
गन्धोदकतिलैर्मिश्रं सातकुम्भकलान्वितम् ।
पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु ।। २० ।।

ज्येष्ठे सिता तु सहितादिमया तृतीया
रंभाभिधा सुत कृता विदुषां मतेन ।
तस्यां विधाय विधिना व्रतमंगनाभि-
र्देवीं प्रपूज्य हवनं क्रियतेनलेषु ।।२१।।

ज्येष्ठ इति । सुत हे पुत्र ज्येष्ठे मासि सिता शुक्ला तृतीया रम्भाभिधा रम्भाख्या विदुषां मतेनादिमासहिता कृता ।

बहूत्तमा तथा रम्भा सावित्री वटपैतृका ।
कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः ।।

इति स्कान्दोक्तेः । तस्यां तृतीयायां व्रतं विधाय विधिना देवीं संपूज्याङ्गनाभिः स्त्रीभिरनलेषु बहुवचनात् पञ्चाग्निषु चतसृषु दिक्षु चत्वारोग्नयः पञ्चमः सूर्यः तेषु ब्राह्मणद्वारा हवनं होमः क्रियते ।

ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ।
कुरु पार्श्वेषु पञ्चाग्नीन् ज्वलमानान् हुताहुतीन् ।।
गार्हपत्यं दक्षिणाग्नि सभ्यं वाऽऽहृवनीयकम् ।
पञ्चमं भास्करं तेज इत्येते पञ्चवह्नयः ।।
एतेषां हव्यमाहुत्य तिष्ठेत्सर्वसुखी स्थिरः ।

इति वचनात् । पूजाविधिस्तु निर्णयामृते ज्ञेयः । अङ्गनाभिः कार्यमिति तु -

इदं व्रतं मया प्रोक्तं याश्चरिष्यन्ति योषितः ।
कान्ताथ पुरुषो वापि ख्यातं रम्भाव्रतं भुवि ।।

इति ।

भार्या पुत्रो गृहं भोगाः कुलवृद्धिर्भविष्यति ।
स्त्रीणां चातुलसौभाग्यं गार्हस्थ्यं सर्वकामिकम् ।।
सत्पत्नीदर्पदलनं वशीकरणमुत्तमम् ।
मृता शिवपुरं याति ततो विष्णुपुरं व्रजेत् ।।

इत्यादिवचनात् ।।२१।।

या श्रावणे धवलपक्षगता तृतीया
सा संयुता फलवती गणनाथतिथ्या ।
प्रोक्ता पुरा मुनिगणैश्च पुराणविद्भिः
संकीर्तिताखिलमतेन मधुस्रवेति ।।२२।।

येति । श्रावणे धवलपक्षगता शुक्लपक्षस्था या तृतीया सा गणनाथतिथ्या चतुर्थ्या संयुता फलवती प्रोक्ता मातृविद्धो गणेश्वर

इति वचनात् । पुराणविद्भिर्मुनिगणैरखिलमतेन अखिलशास्त्रमतेन मधुस्रवेति संकीर्तिता । नभःसिता तृतीया तु परया सहिता तिथिः मधुस्रवेति विख्याता सर्वकामफलदा इति वचनात् ।।२२।।

या कज्जलीत्यभिहिता ह्यसिता नभस्था
तामात्मजोत्तम गृहाण परासमेताम् ।
भाद्रे सितां तु परया हरितालिकाख्यां
मौहूर्त्तिकीमपि कदाचन नादिविद्धाम् ।।२३।।

येति । या तृतीया नभस्था श्रावणे स्थिता असिता कृष्णा कज्जलीत्यभिहिता ख्याता आत्मजोत्तम हे सुतश्रेष्ठ, हि निश्चयं तां परासमेतां परया युक्तां गृहाण ।

रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।।

इति ब्रह्मवैवर्तात् । गौरीव्रते तु–

मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे ।
शुद्धाधिकायामप्यैवं गणयोगप्रशंसनात् ।। इति ।

भाद्र इति तु पुनः भाद्रमासे सितां शुक्लां हरितालिकाख्यां तृतीयां मौहूर्तिकीमपि मुहूर्तव्यापिनीमपि परया समेतां गृहाण ।

मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे ।

इति वचनात् ।

आद्या मधुस्रावणिका कज्जली हरितालिका ।
चतुर्थीमिश्रिता स्त्रीभिर्दिवानक्तं विधीयते ।।
तृतीया नभसः शुक्ला मधुस्रावणिका स्मृता ।
भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका ।।

इति दिवोदासोदाहृतवचनात् । आदिविद्धां द्वितीयावेधयुतां न कदाचन गृहाण मातृविद्धो गणेश्वर इति वचनात् ।

द्वितीयावेधरहितां तु वृद्धामपि पूर्वां आदिविद्धाम् नेति विद्धाया एव निषेधात् ।।२३।।

अन्याखिला सुत सिताप्यसितापि कार्या
यत्नान्नरैरभियुता गणनाथतिथ्या ।
सर्वासु तासु लवणं न चमन्ति सन्तो
नित्योपवासविधिना व्रतमाचरन्ति ।।२४।।

अन्येति । सुत हे तात ! अन्या तृतीयाखिला सितापि यत्नात् गणनाथतिथ्या चतुर्थ्याभियुता नरैः कार्या विधेया गणयुक्ता प्रशस्यत इति ब्रह्मवैवर्तात् । तासु सर्वासु शुक्लाकृष्णासु सन्तो लवणं न चमन्ति न भक्षयन्ति। कूष्माण्डं बृहतीफलानि लवणमिति संग्रहश्लोकोक्तेः, नित्योपवासविधिना व्रतमाचरन्ति कुर्वन्ति ।।२४।।

कार्या सिता नभसि वत्स युता चतुर्थी
सा पूर्वया न परया तु कदाचिदेव ।
भाद्रे सितापि वरदाभिहिता सपूर्वा
मध्याह्नगा न यदि पूर्वदिने प्रशस्ता ।।२५।।

अथ चतुर्थी निर्णीयते । कार्येति वत्स हे तात नभसि श्रावणे सिता शुक्ला चतुर्थी सा पूर्वया युता तृतीयायुक्ता कार्या मातृविद्धो गणेश्वर इति वचनात् । न परया पञ्चम्या तु कदाचिदेवापि युता कार्या भाद्रे भाद्रपदमासे सिता शुक्ला वरदाभिहिता वरदेत्याख्याता चतुर्थ्यपि सपूर्वा पूर्वया युता कार्या वचनं तदेव

चतुर्थी तु तृतीयायां महापुण्यफलप्रदा ।

कर्तव्या व्रतिभिर्वत्स गणनाथसुतोपिणी ।

इति ब्रह्मवैवर्तात्, यदि पूर्वदिने तृतीयायुक्ता मध्याह्नगा मध्याह्नव्यापिनी न तदा परा स्यात् कर्मणो यस्य सः कालस्तत्कालव्यापिनी तिथिरिति वचनात् ।

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत् स्यात्परतश्चेत् परेहनि ।।

इति वृहस्पतिवचनात् ।।२५।।

नो चेद् द्वयोरपि तदापि भवेत्सपूर्वा
सा दुर्लभा रविदिने तिथिरारके वा ।
तस्यां प्रपूजय गणेशमभीष्टसिद्ध्यै
चन्द्रं न पश्य भयमस्ति वृथाभिशापात् ।।२६।।

नोचेदिति । चेद्यदि द्वयोरपि पूर्वपरदिनयोरपि मध्याह्नगा न भवति तदापि सपूर्वा पूर्वया युता भवेत् । प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेत् नृपेति हेमाद्रौ भविष्योक्तेः । सापि चतुर्थी रविदिने आरके भौमदिने वा दुर्लभा–

भाद्रशुक्ला चतुर्थी या भौमेनार्केण वा युता ।
महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ।।

इति वाराहोक्तेः । तस्यामभीष्टसिध्यै गणेशं पूजय । प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपः। इति भविष्योक्तेः तस्यां चन्द्रं न पश्य वृथाभिशापाद्भयमस्ति ।

सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात् पश्येन्न तं सदा ।।

इतिवचनात् ।

कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ।।

इति पराशरोक्तेश्च । चतुर्थ्यां न पश्येदित्यन्वयः । तेन चतुर्थ्यामुदितः पञ्चम्यामदोषाय तद्दोषशान्तये सिंहःप्रसेनमवधी-रित्यादि पठेत् ॥२६॥

कृष्णाश्विने तु नरकाभिहिता चतुर्थी
चन्द्रोदयावधिगता सुत सा विधेया ।
नक्तव्रतं कुरु तपःसितपक्षगायां
सत्यां प्रदोषसमयेऽर्चय ढुण्डिराजं ॥२७॥

कृष्णेति । सुत हे पुत्र आश्विने मासे नरकाभिहिता नरकाख्या चतुर्थी कृष्णा कृष्णपक्षस्था सती च सा चन्द्रोदयावधि-गता चन्द्रोदयव्यापिनी विधेया तत्रैव पूजादेरभिधानात्, तपःसित-पक्षगायां माघशुक्लपक्षस्थायां चतुर्थ्यां प्रदोषमये सत्यां प्रदोष-कालव्यापिन्यां सत्यां ढुण्डिराजम् अर्चय पूजय नक्तव्रतं कुरु ।

माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणा ।
ये त्वां ढुढेर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥

इति काशीखण्डात् ॥२७॥

तेन व्रतेन कुरु पूजनमीश्वरस्य
कुन्दैस्तिथौ गणपतेर्दिवसार्धगायास् ।
चेदिच्छसि श्रियमघोपशमं सुतं वा
तद्वाचर व्रतममूषु चतुर्थिकासु ॥२८॥

तेनेति । वत्स हे पुत्र तस्यामेव दिवसार्द्धगायां मध्याह्न-व्यापिन्यां गणपतेस्तिथौ चतुर्थ्यां तेन नक्तव्रतेन कुंदैः कुंदपुष्पै-रीश्वरस्य पूजनं कुरु ।

माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।
संपूज्य योऽपि नक्ताशी सप्राप्नोति श्रियं नरः ॥

इति कालादर्शोक्तेः । चेदिति । चेद्यदि श्रियं अघोपशमं पापक्षयं सुतं पुत्रं वा इच्छसि तदा अमूषु चतुर्थिकासु व्रतमाचर ।

यस्यां यस्यां यस्य यस्य पूजा तस्यां तस्यां तेन तेन तं तं देवं पूजय ॥२८॥

अन्याखिला सुत सिताप्यसितापि पूर्वा
लम्बोदरव्रतविधौ सपरेतरत्र ।
एतासु वत्स तिलभोजनमप्रशस्तं
सर्वे भणन्ति मुनयो जगतो हिताय ॥२९॥

अन्येति । सुत हे पुत्र अन्याखिला सितासितापि शुक्ला-कृष्णापि लम्बोदरव्रतविधौ पूर्वापूर्वान्विता कार्येति शेषः ।

चतुर्थी तु तृतीयायां महापुण्यफलप्रदा ।
कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी ॥

इति हेमाद्रौ ब्रह्मवैवर्तात् । इतरत्र अन्यदीयव्रतविधौ सपरा परया युता कार्या ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ता पराः पूर्वेण संयुता ॥

इति माधवीये वृद्धवशिष्ठोक्तेः । वत्स हे सुत एताषु सितासितासु चतुर्थीषु सर्वे मुनयो जगतो हिताय तिलभोजनम-प्रशस्तं प्रशस्तं न वदन्ति कूष्माण्डं बृहतीफलानि लवणं वर्ज्ये तिलेति संग्रहश्लोकोक्तेः ॥२९॥

या पञ्चमी नभसि वत्स सिताङ्ग सापि
स्कन्दान्वितैव फलदा फणिपूजनादौ ।
ये पूजयन्ति फणिनोक्षतगन्धपुष्पै-
र्द्वारेषु ते न भयमप्युपयन्ति तेभ्यः ॥३०॥

अथ पञ्चमी निर्णीयते । येति । अङ्ग हे वत्स नभसि सिता सा पञ्चमी नागपंचमीति ख्यातापि फणिपूजनादौ स्कन्दा-न्वितैव षष्ठ्यायुतैव फलदा फलदायिनी भवति ।

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुर्षिता नागा इतरा सचतुर्थिका ।।

इति चमत्कारचिन्तामणौ उक्तेः ।

श्रावणे पञ्चमी शुक्ला सा प्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ।।

इति मदनरत्नेभिधानाच्च । तस्यां पञ्चम्यां फणिनः–

द्वारस्योभयतो लेख्या गोमयेन विषोल्वणाः ।
पूजयेद् विधिवद्वीर दधिदूर्वाङ्कुरैः कुशैः ।।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ।
ये तस्यां पूजयन्तीह नागान् भक्तिपुरःसराः ।।
न तेषां सर्वतो वीर भयं भवति कुत्रचित् ।।३०।।

भाद्रे सिता तु ऋषिपञ्चमिका परा स्या-
न्मध्याह्नगा न यदि वत्स तदा सपूर्वा ।।
तस्यां स्त्रिया सह कुरु त्वमिहर्षिपूजां
संसर्गजातमघमाशु विनाशमेतु ।।३१।।

भाद्र इति ।। वत्स हे पुत्र, भाद्रे मासे सिता शुक्ला ऋषिपञ्चमिका तु परा परान्विता स्यात् । सितापरयुता सा स्यात्पञ्चमीति दीपिकोक्तेः, यदि परा मध्याह्नगा मध्याह्नव्यापिनी न तदा सपूर्वा पूर्वया युता सर्वत्र पञ्चमी पूर्वेति माधवोक्तेः, तस्यां त्वं स्त्रिया भार्यया सह इह ऋषिपूजां कुरु । किं फलमित्यत आह संसर्गजातं भांडादिस्पर्शजातमघं पापमाशु विनाशमेतु गच्छतु ।

या पञ्चमी सहसि शुक्लगताङ्ग तस्यां
नागार्चनादि नभसीव तथा विधेयम् ।।
श्रीपञ्चमी तपसि शुक्लगता विधेया
पूर्वान्विता सुत समृद्धिकृदर्चकानाम् ।।३२।।

येति । अङ्ग हे सुत या सहसि मार्गशिरशुक्लगता शुक्ल-पक्षस्था पञ्चमी तस्यां नभसि इव श्रावणशुक्लपञ्चम्यामिव तथा तेन प्रकारेण नागार्चनादि विधेयम् ।

शुक्ला मार्गशिरेः पुण्या श्रावणे या च पञ्चमी ।
स्नानदानैर्बहुफलाः नागलोकप्रदायिनी ।।

इति हेमाद्रौ स्कान्दोक्तेः ।

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ।।

इति मदनरत्नवचनात् । तपसि माघे शुक्लगता शुक्लपक्षस्था श्रीपञ्चमी अर्चकानां पूजयतां समृद्धिकृत् पूर्वान्विता विधेया ।

श्रावणे पञ्चमी शुक्ला सा प्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ।।

इति संग्रहोक्तेः ।

माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः ।
पंचम्यां कुन्दकुसुमैः पूजां कुर्यात् समृद्धये ।।

इति हेमाद्रौ वाराहोक्तेः ।।२३।।

अन्याखिला सुत सिताप्यसितापि पूर्वा
सा पञ्चमी बहुनिबन्धविचारदक्षैः ।।
प्रोक्ता न भुङक्ष्व खलु तत्र हितार्थमाम्लं
शास्त्रे निषिद्धमिति भाषितमङ्ग नाद्यम् ।।३३।।

अन्येति । सुत हे पुत्र अन्याखिला सिताप्यसितापि सा पञ्चमी वहुनिबन्धविचारदक्षैः वहुशास्त्रविचारनिपुणैः पूर्वा पूर्वान्विता प्रोक्ता ।

चतुर्थी सहिता कार्या पंचमीपरया न तु ।
दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा सिता ॥

इति हारीतोक्तेः ।

प्रतिपत्पञ्चमी चैव सावित्री भूतपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥

इति ब्रह्मवैवर्ताच्च । नोपोष्या इति वचनादुपवासे पूर्वाऽऽन्यत्र परेति निष्कर्षः । अंग हे पुत्र तत्र तस्यां पञ्चम्यां हितार्थं खलु आम्लं न भुङक्ष्व । कूष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लमिति संग्रहश्लोकोक्तेः । शास्त्रे निषिद्धमिति भाषितं वस्तु नाद्यं न भक्षणीयम् ।।३३।।

भाद्रे सतीह्यपरपक्षगता तु षष्ठी
हस्तार्कभूमितनयव्यतिपातयुक्ता ।
शस्तार्चनाय सवितुः कपिलाभिधाना
ब्रह्मर्क्षयुक् क्रतुफलाप्तिकरी सुतेयं ।।३४।।

अथ षष्ठी निर्णीयते–भाद्र इति । सुत हे पुत्र भाद्रमासे अपरपक्षगता कृष्णपक्षस्था सती षष्ठी हस्तार्कभूमितनयव्यतिपात-युक्ता हस्ते रवौ भौमवारव्यतिपातयोगयुताः सवितुः सूर्यस्यार्चनाय शस्ता प्रशस्ता भवति । किंभूता ब्रह्मर्क्षयुक् रोहिणीनक्षत्रयुता सा कपिलाभिधाना कपिलानाम्नी ऋतुफलाप्तिकरी यज्ञफलप्राप्तिकरी हि निश्चम् ।

भाद्रमास्यसिते पक्षे भानौ चैव करे स्थिते ।
पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ।।

इति पुराणसमुच्चयोक्तेः ।

नभस्यकृष्णपक्षे तु रोहिणीपातभूसुतैः ।
युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिताः ।।

इति वाराहोक्तेश्च । हस्तार्कस्तु फलातिशयार्थः । संयोगस्त्वरुणेर्के वै निर्दिष्टा परमेष्ठिनेति तत्रैवोक्तेः । इयं

च योगे सत्येव स्नानदानादौ प्रशस्ता अन्यथा वचना-
भावात् ।।३४।।

स्नानं विधाय सुत कुंकुमदेवदारू-
शीरादिकल्कसहितैः सजलैः पयोभिः ।।
भास्वन्तमर्चय तदा विविधोपचारै-
र्भूषाम्बरादि वितर द्विजपुंगवेभ्यः ।।३५।।
(चेदिच्छसि श्रियमघोपशमं सुतं वा ।
तर्ह्याचर व्रतममूषु चतुर्थिकासु)

स्नानमिति । सुत हे पुत्र कुंकुमदेवदारूशीरादीकल्कसहितैः सजलैः पयोभिर्दुग्धैः तस्यां स्नानं विधाय तदा विविधोपचारैर्भास्वन्तं सूर्यमर्चय । द्विजपुंगवेभ्यो भूषांवरादि वितर प्रयच्छ, अन्यविशेषो हेमाद्रौ स्कान्दे ।

देवदारु तथा शीतं कुंकुमैला मनःसिलां ।
पत्रकं पद्मकं षष्ठी मधुगव्येन पेसयेत् ।।
क्षीरेणालोद्य कल्केन स्थानं कुर्यात्समन्त्रकम् ।
आपस्त्वं शशि देवेश ज्योतिषां पतिरेव च ।।
पापं नाशय मे देव वाङमनः कायकर्मजं ।
पञ्चगव्यकृतस्नानः पंचभंगैः प्रमार्जयेत् ।।

पंचभंगै पञ्चपल्लवैः । तथा

रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद्रविं ।
शक्तितस्तु पलादूर्ध्वं तद्धूर्ध्वं कर्षतोऽपि वा ।।
सौवर्णमरुणं कुर्यात् नौकां चैव तथा रथ ।

तथा

अल्पवित्तोपि यः कश्चित् सोऽपि कुर्यादिमं विधिं । प्रभाखण्डे
स्थापयेदव्रणं कुम्भं चन्दनोदकपूरितम् ।।

रक्तवस्त्रयुगच्छन्नं ताम्रपत्रेण संयुतम् ।
रथो रुक्मरथस्यैव एक चक्रः सुचित्रितः ।।
सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् ।
ततः सूर्यकपिलां च षोडशोपचारैः संपूज्य दद्यात् ।
दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः ।
कपिला सहितो देवो मम मुक्तिं प्रयच्छतु ।।
यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ।
प्रदत्ता सहसूर्येण मम मुक्तिप्रदा भव ।।३५।।

सैवेन्दु षष्ठ्यभिहिता च विधूदयस्था ।
कार्यादिमा यदि न सा परया समेता ।।
सायाह्नगेषसितपक्षगता तु कार्या ।
विल्वेधिवासनविधावसतीन्द्रभेपि ।।३६।।

सैवेति । सेयमेवेन्दु षष्ठी अभिहिता सा च विधूदयस्था चन्द्रोदयव्यापिनी सती आदिमा पूर्वा कार्या यदि तथाविधा पूर्वा न तदा सा परया समेता ।

तद्वद् भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे ।
चन्द्रषष्ठीव्रतं कुर्यात् पूर्ववेधः प्रशस्यते ।।

इति भविष्योक्तेः, पूर्वा

चन्द्रोदये यदा षष्ठी पूर्वाह्णे वा परेहनि ।
चन्द्रषष्ठ्यसिते पक्षे सैवोपोष्या प्रयत्नतः ।।

इति तत्रैवोक्ते । पूर्वत्र चन्द्रोदयव्याप्त्यभावे परापि इषसितपक्षगता, आश्विनशुक्लपक्षस्था षष्ठी तु विल्वे विल्ववृक्षेधिवासनविधौ इन्द्रभे ज्येष्ठानक्षत्रे असत्यपि सायाह्नव्यापिनी कार्या षष्ठ्यां सायं प्रकुर्वीत विल्ववृक्षेऽधिवासनं अधिवासनमभिमंत्रणं इतिपूर्ववचनात् इति कल्पतरूक्तेः ।

जेष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमंत्रणं ।

इति ज्येष्ठायोग प्रासस्त्यमुक्तं भवति असतीत्युक्तं तिथि:शरीरं देवस्य तिथौ नक्षत्रमाश्रितं तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विनेति विद्यापतिलिखितवचनात् ।

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं ।
योगाभावे तिथिर्ग्राह्या देव्या पूजनकर्मणि ।।

इति देवलोक्तेश्च ।।३६।।

मार्गे सिता तु परया प्रयुता विधेया
पौर्वाह्णिकी सुत यदा रविवैधृतिभ्यां ।।
युक्ता तदा मुनिगणैरभिधीयमाना ।
चम्पेति पूर्वपरयोरपि यत्र योगः ।।३७।।

मार्गे इति । सुत हे तात मार्गे मार्गशिरसि सिता शुक्ला षष्ठी तु पौर्वाह्णिकी पूर्वाह्णव्यापिनी सती परया प्रयुता विधेया षड्मुन्योरिति युग्मवाक्यात्, पूर्वाह्णे दैविकं कुर्यादिति वचनादस्य च दैवकर्मत्वात् यदा ररिवैधृतिभ्यां रविवैधृति-योगाभ्यां युक्ता भवति तदा मुनिगणैश्चम्पेत्यभिधीयमाना सती पूर्वापरयोरपि पूर्वेद्यु: परेद्यु वा यत्र योगस्तत्र विधेया ।

मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता ।।

इति ब्रह्माण्डपुराणात् ।

मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंशुमालिन: ।
शततारगते चन्द्रे लिङ्गं स्याद्दृष्टिगोचरम् ।।

इति उभयत्र योगाभावे तु तिथिरेव ग्राह्या ।।३७।।

माघे सिता तु सुत सूर्यतिथिप्रयुक्ता
सा सूर्यषष्ठ्यभिहितादिमया न शस्ता ।
अन्या सितासितगता परया समेता–
स्तैलं त्यजाशु सकलासु हिताय सूनो ।।

माघे इति । सुत हे पुत्र माघे माघमासे सिता शुक्ला तु सूर्यषष्ठी अभिहिता ख्याता सूर्यतिथिप्रयुक्ता सप्तमीयुता शस्ता ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विता ।

इति वचनात् न पूर्वया नागविद्धा न कर्तव्या षष्ठी चैव कदाचनेति स्कान्दात् । अन्या स्कन्दव्रतातिरिक्ताः सिता सितगता अखिलाः शुक्ला कृष्णाश्च परया समेता कार्याः ।

आषाढ शुक्लषष्ठी तु तिथिः कौमारिला स्मृताः ।
कुमारमर्चयेत्तत्र पूर्वात्रो पोष्यतोदिता ।।

इति वाराहोक्तेः । स्कन्दव्रते पूर्वा

कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुता कार्यास्तिथ्यन्ते पारणं भवेत् ।।

इति वचनात् । सर्वत्र स्कन्दव्रते पूर्वा कार्या सूनो हे पुत्र आशु सकलासु षष्ठीषु तैलं त्यज, किं फलं हिताय कूष्माण्डं बृहती फलानि लवणं वर्ज्यं तिलाम्लं तथा तैलमिति संग्रह–श्लोकोक्तेः ।।३८।।

या सप्तमी सितगता सुत माधवे सा
मध्याह्नगा भवति पूर्वदिने प्रशस्ता ।
सर्वप्रकारविधिनाऽपि भवेत्सपूर्वा
तस्यां जनिर्द्युसरितः कथिता मुनीन्द्रैः ।।

अथ सप्तमी निर्णीयते । येति । सुत हे पुत्र या माधवे वैशाखेति सितगता शुक्लपक्षस्था सप्तमी सा मध्याह्नगा पूर्वदिने प्रशस्ता भवति युग्मवाक्यात् । सर्वप्रकारविधिनापि सर्वेण प्रकारेणापि सपूर्वा पूर्वान्विता भवेत् तस्मादेव वचनात् तस्यां मुनीन्द्रैः द्युसरितो गङ्गाया जनिरुत्पत्तिः कथिता ।

वैशाखशुक्लपञ्चम्यां जन्हुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ।।
तां तत्र पूजयेद्देवीं गङ्गागगनमेखलाम् ।।३९।।

ऐषी सिता तु तनयौदयिकी विधेया
पूजोपवासविधिषु व्रतिभिर्मनुष्यैः ।
पूर्वाह्ण एव समये प्रियपत्रिकाणां
पूजा तु सत्यसति वा किल मूलयोगे ।।४०।।

ऐषीति । तनय हे पुत्र ऐषी इषे भवा सिता शुक्ला आश्विनशुक्लपक्षस्था सप्तमी पूजोपवासविधिषु औदयिकी उदय-कालव्यापिनी विधेया व्रतोपवासनियमे घटिकैका तु या भवेत् इति देवलोक्तेः

भगवत्याः प्रवेशादिविसर्गान्ताश्च या क्रिया ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद् बुधः ।।

इति वचनात्

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमिच्छन्ति न ते अतिथियुग्मता ।।

इति वचनाच्च । अत एव पत्रिकाणां पूजा तु पूर्वाह्ण-समये एव कार्या किल मूलयोगे सत्यसति वा

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनं ।
योगाभावे तिथिर्ग्राह्या देव्या पूजनकर्मणि ।।

इति देवलोक्तेः ।।४०।।

गेहं प्रकल्पय ततः कुरु तत्र वेदीं।
तस्यां निधेहि रुचिरासनमात्मजास्मिन् ।।
आवाहयाचलसुतां त्वमसुप्रतिष्ठां।
कृत्वा प्रपूजय ततस्तु बलिं विधेहि ।।४१।।

गेहमिति । आत्मज हे पुत्र ततो विचारणानन्तरं गेहं गृहं कल्पय । तत्र गृहाभ्यन्तरे वेदीं कुरु । तस्यां वेद्यां रुचिरासनं सुन्दरमासनं निधेहि । अस्मिन्नासने अचलसुतां दुर्गामावाहय । तस्या असुप्रतिष्ठां कृत्वा ततस्तदनन्तरं तां प्रपूजय । तदनन्तरं तु त्वं बलिं विधेहि ।

सप्तम्यां नवगेहानि दारुजानि नवानि च ।
एवं वा वित्तभावेन कारयेत्सुसमाहितः ।।
दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनम् ।
तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभाम् ।।
तस्यां सिंहासनं क्षौमं कंवलाजिनसंयुतम् ।
तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम् ।।
भुजैश्चतुर्भी रुचिरैर्दशभिर्वा विभूषितम् ।
तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम् ।।इति।।
अनेककुसुमाकीर्णां कपर्देन सुशोभितां ।
नितम्वविम्वसंनद्ध किंकिणीनादनादिनीम् ।।
शूलचक्रदंडशक्तिवज्रचापासिधारिणीम् ।
घंटाक्षमालाकरकपानपात्रलसत्कराम् ।।
तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतं ।
निसृतार्धतनुं कण्ठे नाले चर्मासिधारिणम् ।।
देवीकरधृतग्रीवां शूलेनोरसि ताडितां ।
नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्रुतम् ।।

तत्र देवी प्रकर्तव्या हैमी वा राजती तथा ।
वार्क्षी वा मार्तकी वापि खड्गशूलेन पूजयेत् ।।
देवी भक्त्यार्चिता पुंसां राज्यायु:सुखसौख्यदा ।

इति ।।४१।।

ना पूर्वतो यदुपवासविधावशक्त-
स्तस्यास्तिथेस्त्रिदिवसं विदधीत भक्त्या ।
नाप्राप्यमस्ति जगतीह च हृद्यमिष्टं ।
तस्मान्नहि त्यज कुरु व्रतमंबिकाया: ।।४२।।

नेति । यत् यदि पूर्वत: प्रतिपत्प्रभृति उपवासविधौ नापुरुष: असक्तस्तदा तस्या सप्तम्यास्तिथेर्भक्त्या त्रिदिवसं दिनत्रयं नवमी-पर्यन्तमुपवासं विदधीत । आश्विनमासि शुक्ले तु कर्तव्यं नवरा-त्रकं प्रतिपदादि क्रमेणैव यावच्च नवमी भवेत्, त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रममिति धौम्योक्ते: ।

अथवा नवरात्रं च सप्तपञ्चत्रिकं दिवा ।
एकभक्तेन नक्तेनायाचितो पोषितै: क्रमात् ।।

इत्यन्यत्राप्युक्ते: किं फलमित्यत आह नेति । इह जगति हृद्यं हृदयप्रियं इष्टं अप्राप्यं दुर्लभं नास्ति । एवमर्चय इति शेष: । देवी भक्त्यार्चिता पुंसां राज्यायु:सुतसौख्यदेति देवीपुराणात् । तस्मात् कारणात् अम्बिकाया व्रतं हि निश्चयं नत्यज किन्तु कुरु विधेहि ।

लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।।
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत् ।
विल्वपुष्पैर्यजेद्देवीं तथा जातिप्रसूनकै: ।।
नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरै: ।।

इति वचनात् ।।४२।।

माघे सिता तु रथसप्तमिका प्रशस्ता
स्नाने धनार्पणविधावरुणोदयाढ्या ।
आधाय मूर्ध्नि वदरस्य दलानि सप्त-
सार्कस्य मज्जनमुतार्कसमर्चनं च ।।४३।।

माघ इति । माघे माघमासे सिता शुक्ला रथसप्तमिका तु स्नाने धनार्पणविधौ द्रव्यदानविधौ अरुणोदयाढ्या अरुणोदय-व्यापिनी प्रशस्ता ।

सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ।।

इति विष्णुवचनात् ।

अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।।
प्रयाग यदि लभ्येत कोटिसूर्य ग्रहैःसमा ।।

इति वचनाच्च ।

अचला सप्तमी दुर्गा शिवरात्रिर्महाभर-
द्वादशी वत्स पूजायां सुखदा प्राग्युता सदा ।।

इति वचनस्य कुत्रावकास इति चेत् यदा प्रातः काले घटिकाद्वयं षष्ठी ततः सप्तमी परेद्यु क्षयवसादष्टम्येव तदा तत्रैवावकासो ज्ञेयः, तत किमित्यत आह्–सार्कस्य सार्कवृक्षस्य वदरस्य सप्तदलानि द्वयोश्चतुर्दशदलानि मूर्ध्नि आधाय धृत्वा मज्जनं नद्यादौ उतापि अर्कसंपूजनं सूर्यपूजनं च कार्यमिति शेषः । कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं इति वचनात् अचलासप्तम्यामिक्षुदण्डेन अचलं जलं चालयित्वार्कपत्रसप्तकं वरदपत्रसप्तकं च शिरसि निधाय स्नायादिति तद्विधि निर्णय-सिन्धौ ज्ञेयः ।।४३।।

अन्याखिला सुत सितासितगा सपूर्वा
कार्या हिताय न कदापि परासमेता ।

भुङ्क्ष्वासु नामलकमार्यगणेन सम्यक्
प्रोक्तं निषिद्धमिति सर्वनिबन्धमध्ये ।।४४।।

अन्येति । सुत हे पुत्र अन्या सितासितगता शुक्लकृष्णपक्षस्था हिताय सपूर्वान्विता कार्या षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदेति स्कान्दात् युग्मवाक्याच्च । परया समेता कदापि न कार्या । आसु सर्वासु सप्तमीषु आमलकं आर्यगणेन सर्वनिबन्धमध्ये निषिद्धमिति सम्यक्प्रोक्तं न भुङ्क्ष्व–कूष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकमिति संग्रहश्लोकोक्ते ।।४४।।

चैत्रेऽष्टमी सुत सिता परया युता स्याद्
दुर्गावलोकनसमर्चनयोः प्रशस्ता ।
अस्यामशोककलिकाः प्रपिबात्मजाष्टौ
शोको विनङ्क्ष्यति महानपि ते समन्त्राः ।।४५।।

अथाष्टमी निर्णीयते । चैत्र इति सुत हे पुत्र चैत्रमासे शुक्लाष्टमी दुर्गावलोकनसमर्चनयोः कर्मणि परया युता प्रशस्ता स्यात् । अष्टमी नवमीयुक्ता नवमी चाष्टमी युतेति ब्रह्मवैवर्तात् ।

भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः ।
न जातु श्लोकं लभते सदानन्दमयो भवेत् ।।

इति काशीखण्डात् । अस्यां समन्त्राः मन्त्रेण सहाष्टौ अशोककलिकाः प्रपिब किं फलमित्यत आह– हे आत्मज ते तव महानपि शोको विनङ्क्ष्यति नाशं यास्यति ।

अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रमासि सिताष्टम्यां न ते शोकमवाप्नुयुः ।।

इति हेमाद्रौ लैंगात् । मन्त्रस्तु–

त्वामशोकवराभीष्टं मधुमाससमुद्भवम् ।
पिबापि शोकसंतप्तं मामशोकं सदा कुरु ।।

यद्यष्टमीयमपि सा ऽ दितिसौम्ययुक्ता
स्नाने तदाधिकफला मुनिभिः प्रदिष्टा ।
स्नानं तु योऽत्र विदधीत नरः प्रभाते ।
द्राग्वाजपेयमखतुल्यफलं लभेत ।।४६।।

यदीति । इयमप्यष्टमी यदि साऽऽ दितिसौम्यायुक्ता पुनर्वसुनक्षत्रबुधवारयुता स्यात्तदा स्नाने मुनिभिरधिकफला प्रदिष्टा । अत्र यः प्रातरेव स्नानं विदधीत स नरः द्राक् शीघ्रं वाजपेयमखतुल्यफलं लभेत ।

पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी ।
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत् ।।

इति पृथ्वीचन्द्रोदयप्रयोगात् ।।४६।।

द्वेधाष्टमी नभसि कृष्णगता निशीथे ।
युक्ता कभेन रहिता च बुधैः प्रदिष्टाः ।।
आद्या जयन्त्यभिहितांग ततो द्वितीया ।
जन्माष्टमीति कथिता व्रतिभिर्विधेया ।।४७।।

द्विधेति । अङ्ग हे तात नभसि श्रावणे कृष्णगताऽष्टमी द्वेधा द्विविधा बुधैः प्रदिष्टा । निशीथे सती निशीथव्यापिनी सती कभेन रोहिणीनक्षत्रेण युक्ता एका तथा सती कभेन रहिता च द्वितीया ।

रोहिणीसंयुतो पोष्यो सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्ध्वं कलया वा यदा भवेत् ।।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ।।

इति अग्निपुराणात् ।

ये न कुर्वन्ति जानन्त कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञव्याला व्याघ्राश्च कानने ।।

इति स्कान्दाच्च ।

आद्या जयन्त्यभिहिता ततस्तदनन्तरं द्वितीया जन्माष्टमीति कथिता व्रतिभिर्विधेया उपोषितुं योग्या ।।४७।।

काम्या च वत्स नियता च जयंत्युपोष्या ।
जन्माष्टमी तु नियतैव न जातु काम्या ।।
प्रत्येकमात्मज ततो भवतश्चतुर्द्धे ।
तत्राद्ययोर्न भज संशय मन्तराधिम् ।।४८।।

काम्येति । वत्स हे सुत उपोष्या सा जयन्ती काम्या च नियता नित्या च ।

महाजयार्थं कुरुतां जयन्तीं मुक्तयेनघ ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुङ्गव ।।
ददाति वाञ्छितानर्थानानार्थानतिदुर्लभान् ।

इति स्कान्दादौ फलश्रुतेः ।

शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभते कुन्ती जयन्तीविमुखो नरः ।।
न करोति यदा विष्णोर्जयन्ती सम्भवं व्रतम् ।
यमस्य वशमापन्नो स भुङ्क्ते नारकीं व्यथां ।।

इति अकरणे निन्दाश्रुते । जन्माष्टमी तु नियता नियता नित्यैव नजातु कदाचिदपि काम्या ।

वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाप्राज्ञ व्याली भवति कानने ।।

इति स्कान्दे वीप्साश्रुते । आत्मज हे पुत्र ततस्तदनन्तरं ते द्वे जयन्तीजन्माष्टम्यौ प्रत्येकं चतुर्धे तत्राष्टानां भेदानां मध्ये

द्वयोरेवाद्ययोर्द्वयोर्द्वयोर्भेदयोरंतराधि संशयं न भज कर्मकालव्याप्तिसत्वात् ।

कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी ।।

इति पाद्मोक्तेः ।

सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि ।
भविता साष्टमी पुण्या यावच्चन्द्रदिवाकरौ ।।

इति वह्निपुराणाच्च ।

जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिभांते च पारणा ।।

इति भृगूक्तेश्च ।।४८।।

पूर्वेद्युरेव यदि पद्मजभं निशीथे ।
तस्मिंस्तदृक्षमथवापि परेद्युरेव ।।
तत्रैव वत्स कुरु तद्व्रतकं जयन्त्या ।
यद्यष्टमी भवति तत्र तदृक्षयुक्ता ।।४९।।

चतुर्विधत्वं स्फुटयति-पूर्वेद्युरेवेति । वत्स हे पुत्र यदि पद्मजभं रोहिणीनक्षत्रं पूर्वेद्युरेव निशीथे भवति तदा तत्रैव पूर्वेद्युरेव अथवा तस्मिन् निशीथे तदृक्षं रोहिणीनक्षत्रं यदि परेद्युरेव भवति तत्रैव परेद्युरेव तज्जयन्त्या व्रतमेव व्रतकं कुरु । यदि तत्र निशीथे तदृक्षयुक्ता रोहिणीयुक्ताष्टमी भवति कार्याविद्धापि सप्तम्येत्यादिवचनात् ।।४६।।

विद्येत पूर्वपरयोर्यदिभं निशीथे ।
कार्या परैव यदि नोभयतोपि सैव ।।
जन्माष्टमीव्रतविधावपि स प्रकारो ।
योगस्तु संभवति तत्र निशीततिथ्योः ।५०।

विद्येतेति । यदि भं नक्षत्रं पूर्वपरयोः परेद्युः परेद्युश्च निशीथेष्टमी तदा परैव ।

वर्जनीया प्रयत्नेन सप्तमी संयुताष्टमी ।
सऋक्षापि न कर्तव्या सप्तमी संयुताष्टमी ॥

इति ब्रह्मवैवर्तात् । यदि उभयतोपि पूर्वपरयोरपि निशीथे भं न विद्येत तदापि सैव परैव-

यस्मिन् वर्षे जन्यन्त्याख्यो योगोजन्माष्टमी तता
अन्तर्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः ।

इति माधवोक्तेः ।

पूर्वविद्धाष्टमी या तु उदये नवमी दिने ।
मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत् ॥
कलाकाष्ठा मुहूर्तापि यदा कृष्णाष्टमी तिथिः ।
नवम्यां सैव ग्राह्या स्यात् सप्तमी संयुता न हि ॥

इति पाद्मोक्तेश्च । जन्माष्टमीति जन्माष्टमी व्रतविधावपि सः प्रकारः स एव विचारः, योगस्तु तत्र निशीथतिथ्योः संभवति यास्मिन्निशीथेष्टमी तस्मिन्नैवेत्यर्थः । जन्माष्टम्या अपि अन्त्ययोर्भेदयोश्चैव प्रातः संकल्पकालव्याप्तेराधिक्यात् वर्जनीया प्रयत्नेन सप्तमी संयुताष्टमीति ब्रह्मवैवर्ताच्च ॥५०॥

व्याप्ता निशीथमखिलं विधिभेन युक्ता ।
यद्यष्टमी भवति वत्स स मुख्य कालः ॥
तत्र स्वयं स भगवाञ्जगतो हिताय ।
कंसं जिघांसुरजनोपि विभुः प्रजज्ञे ॥५१॥

व्याप्तेति । वत्स हे सुत यदि अष्टमी अखिलं निशीथव्याप्ता सती विधिभेन रोहिणीनक्षत्रेण युक्ता भवति स मुख्य कालः स एव मुख्य काल इत्यर्थः तस्यां वेलायां जगतो हिताय कंसं जिघांसुर्हन्तुमिच्छुः स भगवान् अजनोपि जन्मरहितोऽपि विभुः श्रीविष्णुः प्रजज्ञे श्रीकृष्णाख्यया जातः ।

अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मतजम् ।।

इति भविष्योक्तेः ।

अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि ।
मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम् ।।

इति वशिष्ठसंहितोक्तेश्च ।

अभिजिन्नामनक्षत्रं जयन्ती नाम शर्वरी ।
मुहूर्तो विजयो नाम यत्र जातो जनार्दन ।।इति।।

स्नात्वा तिलैः सरिति वा विमले ह्रदादौ ।
स्थानं प्रकल्पय सुत प्रतिमां निधाय ।।
तस्यां प्रपूजय हरिं जनकादियुक्तं ।
नानोपचारविधिना लिखितं पटे वा ।।५२।।

स्नात्वेति । सरिति विमले निर्मले ह्रदादौ वा तिलैः स्नात्वा स्थानं प्रकल्पय–

ततोष्टम्यां तिलैः स्नात्वा नद्यादौ विमले जले ।
सुदेशे शोभनं कुर्या देवक्या सूतिकागृहम् ।।

इति वचनात् । सुत हे पुत्र तत्र प्रतिमां निधाय तस्यां नामोपचारविधिना षोडशाद्युपचारप्रकारेण हरिं प्रपूजय, तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता इति वचनात् । वा अथवा पटे लिखितं वर्णकैर्लिखिताथवेत्युपक्रम्य लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्पर इति वचनात् । किं भूतं जनकादियुक्तं । पित्रादियुक्तं

प्रस्नुतां च प्रसूतां च स्थापयेत् मञ्चकोपरि ।
मा तत्र बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।।
यशोदां तत्र चैकस्मिन् प्रदेशे सूतिकागृहे ।
तद्वच्च कल्पयेत्पार्थप्रसूतवरकन्यकाम् ।।

कश्यपो वसुदेवोयमदितिश्चैव देवकी ।
शेषो वै वलभद्रोऽयं यशोदाक्षितिरन्वभूत् ।।
नन्दः प्रजापतिर्दक्षो गर्भश्चापि चतुर्मुखः ।
गौ धेनुः कुञ्जरश्चैव दानवा शस्त्रपाणय ।।
लेखनीयश्च तत्रैव कालीयो यमुनाह्लदे ।
इत्येवमादि यत्किञ्चित् शक्यते चरितं मम ।।
मन्त्रेणानेन कौन्तेय देवकी पूजयेन्नरः ।
गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादै
श्रृगारादर्शकुम्भप्रवरकृतकरैः किंकरैः सेव्यमाना ।।
पर्यङ्के ह्यास्तृते सा मुदिततरमुखी पुत्रिणी सम्यगास्ते ।
सा देवी देवमाता जयति सुतनया देवकी कान्तरूपा ।।

इत्यादि ।।५२।।

देहीन्दवेऽर्घ्यमथ पारणमाचरान्ते ।
विप्रांश्च भोजय कुरुष्व विशेषदानम् ।।
धर्मादिषु प्रियमतीव यदस्ति सर्वं ।
नाप्राप्यमात्मज भविष्यति तत्प्रसादात् ।।५३।।

ततः किमित्यत आह–देहीति । आत्मज हे पुत्र अथानन्तरं इन्दवे अर्घ्यं देहि ततो मन्त्रेण वै दद्याच्चन्द्रायार्घ्यं समाहित इति वचनात्, अन्ते रात्र्यन्ते पारणमाचर कुरु ।

तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणं ।
तस्मात्प्रयत्नतः कार्यं पारणं त्वपरेहनि ।।

इति हेमाद्रौ वचनात् ।

न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशाम् ।।

इति ब्रह्मपुराणात् । अशक्तौ तु–

भान्ते कुर्यात्तिथेर्वापि शस्तं भारत पारणम् ।।

इति गारुडे विष्णुधर्मे च ।

जयन्त्यां पूर्वविद्धायां उपवासं समाचरेत् ।
तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्याच्च पारणम् ।।

इति कालादर्शोक्तेश्च । च पुन विप्रान् भोजय ।

प्रभाते ब्राह्मणान् शक्त्या भोजयेद् भक्तिमान्नरः,

इति वचनात् विशेषदानं कुरुष्व । ब्राह्मणेभ्यो विशेषेण विशिष्टभावेन दानं देहि । किं फलमित्यत आह–धर्मादिषु धर्मार्थकाममोक्षेषु यदतीव प्रियं तत्सर्वं तत्प्रसादात् श्रीकृष्णप्रसादान्नाप्राप्यं दुर्लभं नभविष्यति ।

जन्माष्टमी व्रतं ये वै प्रकुर्वन्ति नरोत्तम ।
कारयन्त्यखिलान् लोकान् लक्ष्मीस्तेषां सदा स्थिरा ।।

इति वचनात् ।

सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमीव्रते इति ।।५३।।

भाद्रे सिता तु सुत सादिमया समेता
दूर्वाष्टमीति मुनिभिः प्रथिता जगत्याम् ।
दूर्वां समर्चयति या नुदये महर्षेः
सिंहे रवौ सति न सा लभते वियोगम् ।।५४।।

भाद्र इति । सुत हे पुत्र भाद्रमासे सिता शुक्ला तु मुनिभिर्जगत्यां दूर्वाष्टमीति प्रथिता आख्याता ।

शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् ।
दूर्वाष्टमी सा विज्ञेया नोत्तरा सा विधीयते ।।

इति पुराणसमुच्चयवचनात् । सा आदिमयोर्पूर्वया समेता कार्येति शेषः

स्रावणी दुर्गनवमी दुर्गा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्वलेर्दिनम् ।।

इति वचनात् । या स्त्री सा तस्यां दूर्वां समर्चयति सा वियोगं पत्युर्विरहं न लभते ।

या न पूजयते दूर्वां मोहादिह यथाविधिः ।
त्रिणी जन्मनि वैधव्यं लभते नात्र संशयः ।।

इत्यकरणे दोषश्रुतेः किंभूतायां महर्षेरगस्त्यस्य मुनेरनुदये उदयात्प्रागेव सत्यां ।

अगस्त्येभ्युदिते तात पूजयेदमृतोद्भवाम् ।
वैधव्यं पुत्रशोकश्च दशजन्मनि पञ्च च ।।

इति करणे विघ्नोत्पत्तिदर्शनात् पुनः किंभूतायां सिंहे रवौ सति सत्यां सिंहार्के सा च कर्तव्या कन्यार्के न कदाचन, इति वचनात् ।

सिंहस्थे सोत्तमा सूर्ये नुदिते मुनिसत्तमे ।।

इति वचनात् ।।५४।।

मूलं वृषर्क्षमथवा यदि वत्स तस्यां
कुर्यात्तदा परदिनेप्यपराह्णगायाम् ।
योगस्तयोर्यदि भवेद्दिवसद्वये ऽपि
नक्तव्रतेन विदधीत न लङ्घयेत ।।५५।।

मूलमिति । वत्स हे तात तस्यां भाद्रशुक्लायां यदि मूलं अथवा वृषर्क्ष्यं ज्येष्ठानक्षत्रं तदा परदिनेपि पराविद्धायामपि अपराह्णगायां कुर्यात् ।

मुहूर्त्ते रौहिणेष्टम्यां पूर्वा वा यदि वा परा ।
दूर्वाष्टमीति सा कार्या ज्येष्ठां मूलं च वर्जयेत् ।।

इति रौहिणस्य नवममुहूर्त्तस्य कर्मकालतत्त्वदर्शनात् । यदि दिवसद्वयेपि कर्मकालव्यापी नक्षत्रयोर्योगो भवेत् तदा नक्त-व्रतेन विदधीत दूर्वार्चनं प्रकुर्वीत ।

कर्तव्या चैकभक्ते च ज्येष्ठा मूलं यदा भवेत् ।
दूर्वामभ्यर्चयेद्भक्त्यानवन्ध्यं दिवसं नयेत् ।।

इति वचनात् । अत एव न लंघयेत दूर्वाष्टमीं नातिक्रामेदित्यर्थः ।।५५।।

चेत् कुम्भयोनिरुदियात्सुत भास्करो ऽपि
कन्यां व्रजेद्यदि तदा तु सितेतरस्याम् ।
तस्मिन् व्रते त्वनुभवेदकृशानुपक्वं
क्षारं न जातु लवणं च हिताय खादेत् ।।५६।।

चेदिति । आत्मज हे पुत्र चेत् यदि कुम्भयोनिरगत्यमुनि रुदियात् उदयं गच्छेत् भास्करः सूर्योऽपि कन्यां व्रजेत्तदा सितेतरस्यां पूर्वकृष्णाष्टम्यां कुर्यादिति शेषः ।

कृष्णाष्टम्यां प्रकुर्वीत दुर्वार्चनमतन्द्रित ।
शुक्लायां यदि कन्यार्को मुनेरुदय एव च ।।

इति वचनात् । तस्मिन् व्रते तु अकृशानुपक्वं अनग्निपक्वं अनुभवेत्, क्षारं वस्तु लवणं च हिताय नखादेत् ।

अनग्नीपक्वमश्नीयादन्नं दधिफलं तथा ।
अक्षारलवणं ब्रह्मन्नश्नीयान् मधुरान्वितम् ।।

इति वचनात् ।।५६।।

भाद्रे ऽष्टमी बहुलपक्षगता सपूर्वा
चन्द्रोदयावधिसमेतवती विधेया ।
व्याप्ता मुहूर्त्त दशकं तु परैव कार्या ।
सा त्रिस्पृशा यदि भवेन्न तदाऽऽरभेत ।।५७।।

भाद्रे इति । भाद्रे मासे वहुलपक्षगता कृष्णपक्षस्थाष्टमी चन्द्रोदयावधिसमेतवती चन्द्रोदयपर्यन्तं स्थिता सती सपूर्वा

पूर्वान्विता विधेया । विशेषणपरित्याज्या नवमी दूषिता यदि इति वचनात् । मुहूर्त्तदशकं व्याप्ता तु रात्रौ दशमुहूर्त्तपर्यन्तं स्थिता तु परेव कार्या ।

पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रिमुहूर्त्तापि सा पूज्या परतश्चोर्ध्वगामिनी ॥

इति संग्रहोक्तेः ।

अर्धरात्रमतिक्राम्य वर्द्धते योत्तरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ॥

इति वचनात् । सा यदि त्रिस्पृशा भवेत्तदा तस्यां नारभेत प्रथमारम्भं न कुर्वीत ॥५७॥

आरभ्य तत्र परिपूजय पुत्र लक्ष्मीं
यावद्रविर्दशदिनानि च पञ्च याति ॥
तावत्समापय ततो न परं कदापि ।
हस्तोत्तरार्द्धगतभास्करतो भयं स्यात् ॥५८॥

आरभ्येति । तत्र तस्यामष्टम्यां लक्ष्मीव्रतमारभ्य परिपूजय यावद्रविः दशपंच च पञ्चदशदिनानि न याति तावत्समापय

श्रियोर्चनं भाद्रपदे सिताष्टमीं
प्रारभ्य कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्
सूर्यस्तु पूर्वार्द्धगतो युवत्या ।।

इति पुराणसमुच्चयात्, ततः परं तु पंचदशदिनानन्तरं तु । न कदापि कस्मादित्यत आह हस्तोत्तरार्द्धगतभास्करतो भयं स्यात् ।

कन्यागतेर्के प्रारभ्य न कर्तव्यं श्रियोर्चनम् ।
हस्तप्रान्तदलस्थेर्के तद्व्रतं न समापयेत् ॥इत्ति॥

त्रिदिने चावसे ? चैव अष्टमी नोपवासयेत् ।
पुत्रहा नवमी विद्धास्वग्घ्नी हस्तार्कगे रवौ ।।

इति ।।५८।।

कार्याष्टमीषसितपक्षगता नवम्या ।
युक्ता न जातु सुत सा प्रयुतादितिथ्या ।।
दण्डैकभागपि परा किमुतो दयाढ्या ।
तत्रोपवासविधिना क्रियतेऽम्बिकार्चा ।।५९।।

कार्येति । सुत हे पुत्र इषसितपक्षगता आश्विनशुक्लपक्ष–स्थाष्टमी महाष्टमी दण्डैकभागपि मुहूर्त्तार्धस्था अपि नवम्या युक्ता परैव कार्या ।

शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्यापरसंयुता ।

इति वचनात् ।

व्रतोपवासनियमे घटिकैकापि या भवेत् ।।

इति देवलोक्तेश्च । सा तिथिरादितिथ्या प्रयुता नजातु कदाचिन्नकार्या ।

सप्तमी शल्यसंयुक्ता मोहादज्ञानतोपि वा ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ।।इति।।
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जंभ यस्माद्दानवपुंगवः ।।
तस्मात्सर्वप्रयत्नेन सप्तमी संयुताष्टमी ।
वर्जनीया प्रयत्नेन मनुजैः शुभकांक्षिभिः ।।
शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ।।

इत्यादिवचनात् ।

अष्टमी नवमीविद्धा नवमी चाष्टमी युता ।

इति पाद्माच्च । किमुतोऽदयाढ्या उदयव्यापिनी परैवेति तु किमु वक्तव्यमित्यर्थः किं त्रियत इत्यत आह तत्र तस्यां उपवासविधिना अम्बिकार्चा चण्डिकापूजा क्रियते, तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनीति वचनात् ।।५९।।

सूर्योदयावधिगतापि ततो नवम्या ।
युक्ता कुजेन सहितेयमतिप्रशस्ता ।।
मूलर्क्षयोगसहिता यदि साष्टमी स्यात् ।
प्रोक्ता महानवमिकेति वदन्ति सन्तः ।।६०।।

सूर्येति । ततस्तदनन्तरं सूर्योदयावधिगता सूर्योदयव्यापिन्यपि नवम्या युक्ता सति कुजेन मङ्गलवारेण सहितेयं अतिप्रशस्ता प्रशस्ततरा साऽपि मूलर्क्षयोग सहिता यदि स्यात् तदा संत महानवमिका प्रोक्तेति वदन्ति ।

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ।।

इति वचनात् ।

अश्वयुक् शुक्लपक्षेयाष्टमीमूले न संयुता ।
सा महानवमी प्रोक्ता त्रैलेक्येपि सुदुर्लभाः ।।

इति स्कान्दात् ।।६०।।

सूर्योदये रवितिथिः परतोष्टमी स्यात् ।
रात्रौ गता यदि लयं नवमी प्रभाते ।।
तदर्च्चेव वत्स फलदा प्रयुतार्कतिथ्या ।
नैवान्यथा मुनिमतं महतो महीयः ।।६१।।

सूर्येति । वत्स हे तात सूर्योदये रवितिथिः सप्तमी परतः सूर्योदयानन्तरं अष्टमी सती रात्रौ लयं क्षयं गता प्रभाते परेद्युः

प्रातःकाले नवमी यदि स्यात् तर्ह्येव तदैव अर्कतिथ्या सप्तम्या प्रयुक्ता साष्टमी फलदा भवति ।

यदा सूर्योदये न स्यान्नवमी चापरेऽहनी ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृपः ।।

इति स्मृतिसंगृहोक्तेः ।

उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिपः ।
पूर्वाष्टमीं तदा कुर्यादन्यथात्वशुभं भवेत् ।।

इति दुर्गोत्सवोक्तेश्च । अत एव अन्यथा नैव पूर्वोक्तवचनात् । मुनिमतं मरूतोपि महीयो महत्तरं भवति ।।६१।।

तत्रोपवासविधिरात्मज पुत्रवद्‌भिः ।
कार्यो न जातु परिपूजनमेव नित्यं ।
कार्यो बलिश्च महिषादिभिरष्टसिद्धयै ।
लोहाभिसारिकविधिश्च नृपैर्विधेया ।।६२।।

तत्रेति । आत्मज हे पुत्र तत्र तस्यां महाष्टम्यां उपवासविधिः पुत्रवद्भिर्जातु कदाचिन्नकार्यः ।

उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथा च शुद्धात्मा व्रती देवीं प्रपूजयेत् ।।

इति वचनात् । किं तर्हीत्यत आह– नित्यं पूजनमेव तस्मादेव वचनात् च पुनः इष्टसिद्धयै महिषादिभिर्बलिः कार्यः ।

तस्यां येऽप्युपयुज्यन्ते प्राणिनो महिषादयः ।
सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं नविद्यते ।।

इत्यादिवचनात् च पुनः लोहाभिसारिकविधिश्च नृपैर्विधेयः जयाभिलाषिनृपतिः प्रतिपत्प्रभृति क्रमात् लोहाभिसारकं कारयेद्यावदष्टमीति वचनात् । तत्कर्म तु–

प्रागुदक् प्रवणे देशे पताकाभिरलंकृते ।
मंडपं कारयेद्दिव्यं नवसप्तकरं परम् ।।

षोडशहस्तमित्यर्थः ।

आग्नेयां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्यास्वत्थदलाभया ।।
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्यत्राधिवासयेत् ।।
ततस्तु व्राह्मणः स्नातः शुक्लाम्वरधरः शुचिः ।
ॐकारपूर्वकै मन्त्रै तस्त्रिगैर्जुहुयाद्धृतैः ।।
शस्त्रास्त्रमन्त्रैर्होतव्यं पायसघृतसंयुतम् ।
हुतशेषं तुरङ्गानां राजानमुपहारयेत् ।।
लोहाभिसारिकं कर्म तेनैतदृषिभिः स्मृतम् ।।

इति ।।६२।।

छत्रादिचिह्नमखिलं सुत पूजनीयम् ।
राज्ञो विधेयमथ जागरणं च रात्रौ ।।
नृत्यं सगीतमुत वाद्यमनेकवारं ।
कार्या महोत्सवविधौ गिरिजाभितुष्टचै ।।६३।।

छत्रादीति । सुत हे तात राज्ञ छत्रादिचिह्नं अखिलं पूजनीयम् ।

पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ।
तस्याभिस्मरणाद्राज्ञो विजया समुदाहृतः ।।

इति वचनात् । अथानान्तरं च पुनः रात्रौ जागरणं विधेयं सर्वक्रत्वेति कौरव्य अष्टम्यां जागरं निशि इति वचनात् । उत आपि महोत्सविधौ गिरिजाभितुष्टचै संगीतनृत्यं अनेकवारं वाद्यं कार्यं नटनर्तकगीतैश्च कारयेच्च महोत्सवमिति वचनात् ।।६३।।

ऊर्जेष्टमी बहुलपक्षगता तु रात्रि
व्यापिन्युपोषण विशेषफला प्रदिष्टा
व्याप्तौ तु पूर्वपरयोरपि सा परैव
श्रीकालभैरवमथार्चय वत्स तस्याम् ।।६४।।

ऊर्ज इति । वत्स हे तात ऊर्जे कार्तिकमासे बहुलपक्षगता कृष्णपक्षस्थाष्टमी तु रात्रिव्यापिनी उपोषणविशेषफला उपोषणे अधिकफलदायिनी प्रदिष्टा ।

मार्गशीर्ष सिताष्टष्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्यात्सर्वपापैः प्रमुच्यते ।।

इति अत्र रात्रिव्रतत्वावगतेः

रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः ।

इति ब्रह्मवैवर्ताच्च, पूर्वपरयोर्द्विवसद्वयेपि रात्रिव्याप्ति सत्वे तु साष्टमी परैव परेहन्येव कार्या । तस्या किं कर्तव्यमित्यत आह अथानन्तरं तस्यां श्रीकालभैरवं अर्चय मार्गशीर्षसिताष्टम्यां इत्यादि पूर्वोक्तिचनात् । मार्गशीर्ष इति गौणचान्द्राभिप्रा-येण ।।६४।।

कार्याष्टमी सुत सितास्वहिताय माघे
युक्ता सदैव परया न कदापि पूर्वा ।
श्राद्धं विधेयमभितृप्तिकरं पितृणां
भीष्माय देयमथ वारितिलैर्विमिश्रम् ।।६५।।

कार्येति । सुत हे पुत्र माघमासे सिता शुक्लाष्टमी स्वहिताय सदा परयैव युता कार्या

व्रतमात्रेष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा ।।

इति माधवोक्तेः। परयुक् शुक्लाष्टमी पूर्वयुक् कृष्णेति दीपिकोक्तेश्च। अत एव पूर्वा पूर्वान्विता कदापि कदाचिदपि न विधेयेति शेषः। तस्यां किमित्यत आह पितृणामभितृप्तिकरं श्राद्धं विधेयं हि निश्चयं

माघमासे सिताष्टम्यां सतिलं जलतर्पणम्।
श्राद्धं च ये नराः कुर्युस्ते स्युः सन्तानभागिनः॥

इति पाद्मोक्तेः।

शुक्लाष्टम्यां तु माघस्य दद्याद् भीष्माय यो जलम्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥

इति भारतोक्तेः। अत एव भीष्माय तिलैर्मिश्रं वारिजल देयम्।

अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकम्।
अन्नं च विधिवद् दद्युः सर्वे वर्णा द्विजातयः॥

इति वचनात्॥६५॥

अन्याखिला सुत सिता परया युता स्यात्
पूर्वान्विता बहुलपक्षगता तु सर्वा।
आस्वष्टमीषु सकलास्वपि नारिकेलं
नैवाद्धि दूरमपसारय पालयाज्ञाम्॥६६॥

अन्येति। सुत हे तात अन्याखिला शुक्लाष्टमी परया युता स्यात्, बहुलपक्षगता कृष्णपक्षस्था सर्वा पूर्वा कृष्णा पूर्वासितोत्तरेति माधवोक्तेः। आसु सकलासु अष्टमीषु नारिकेलं नाद्धि न भक्षय दूरं अपसारय आज्ञां पालय। कूष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकं दिवं प्रवसता शीर्षमित्यादि संग्रहश्लोकोक्तेः॥६६॥

चैत्रे सिता तु नवमी सुत सा विधेया
मध्याह्नगा भवति योभयतः परा स्यात् ।
नोचेद्द्वयोरपि तथा दिति भान्वितापि
त्याज्यादिमार्चनविधौ रघुनन्दनस्य ।।६७।।

अथ नवमी निर्णीयते । चैत्र इति । सुत हे पुत्र चैत्रे चैत्रे मासे सिता शुक्ला नवमी तु या मध्याह्नगा मध्याह्नव्यापिनी सा विधेया उभयत्र व्याप्ता परा परान्विता विधेया ।

चैत्रे शुद्धे तु नवमी पुनर्वसुयुतामपि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ।।

इत्यगस्त्यसंहितोक्तेः ।

पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ।
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।।
केवलापि सदोपोष्या नवमी शब्दसंग्रहात् ।
तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ।।

इति चेत् द्वयो पूर्वपरयोरपि न तथाप्यदितिभान्वितापि पुनर्वसुयुतापि आदिमा पूर्वान्विता त्याज्या ।

नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां च दशम्यां चैव पारणम् ।।

इति तत्रैवोक्तेः ।

विद्धैव चेदृक्षयुक्ता व्रतं तत्र कथं भवेत् ।
विद्धा निषेध श्रवणान्नवमी चेति वाक्यतः ।
वैष्णवानां विशेषान्तु तत्र विष्णुपरैरपि ।
दशम्यादिषु वृद्धिश्चे द्विज त्याज्यैव वैष्णवैः ।।
तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम् ।।

इति रामार्चन चन्द्रिकोक्तेश्च । कस्मिन्कर्मणीत्यत आह रघुनन्दनस्यार्चनविधौ पूजाविधाने ।।६७।।

लुप्ता यदा तु दशमी त्रिमुहूर्त्तगापि
कार्या परैव नवमी रघुनाथभक्तैः ।
अन्यैस्तु शैवतिथि वेधयुतापि कार्या
तस्मात्कुरु त्वमुपवासमिहैव भक्त्या ॥६८॥

लुप्तेति । यदा तु त्रिमुहूर्तगापि मुहूर्त्तत्रयव्यापिन्यपि दशमी लुप्ता क्षयं गता तदा रघुनाथभक्तै वैष्णवै परैव परान्वितैव नवमी विधेया । अन्यैस्तु शैवतिथिवेधयुतापि अष्टमी-विद्धापि पूर्वा कार्या ।

तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम् इति वचनात् । तस्मात्त्वं तथाविधायां तु भक्त्या इहैव पूर्वत्रैवोपवासं कुरु ।

चैत्रे नवम्यां प्राक् पक्षे दिवा पुण्ये पुनर्वसौ ।
उदये गुरुगौरांश्वोः स्वच्चस्थे ग्रहपञ्चके ॥
मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत्सकलया कौशल्यायां परःपुमान् ॥
तस्मिन्दिने तु कर्तव्यमुपवास व्रतं तदा ।
तत्र जागरणं कुर्या रघुनाथ परो भुवि ॥

इति अगस्त्यसंहितोक्तेः । त्वमत्रैव कुर्विति तु यदि त्वया गृहस्थेन परदिन एवोपवासः क्रियते तदा उपवासात्परेद्यु र्गृहस्थो-पोष्यैकादशो सत्वात्पारणालोपः स्यात् वैष्णवानां तु विद्धैकादश्यां हेयत्वात्परत्रापि पारणावकाशात् गृहस्थैः पूर्वा वैष्णवै परेति उक्तमित्याश्रयः ॥६८॥

नित्यं कुरुव्रतमदः कृतकामनो वा
रामं प्रपूज्य कुरु जागरणं च रात्रौ ।
विप्राय देहि वसु वत्स न वित्तशाठ्यं
त्वं ब्रूहि पातकशतं क्षयमाशुगन्ता ॥६९॥

नित्यमिति । वत्स हे पुत्र अद इदं व्रतं नित्यं कुरु ।

यस्तु रामनवम्यां वै भुक्ते मोहाद्विमूढधीः ।
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ।।

इति वचनात् ।

अकृत्वा रामनवमी व्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ।।
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ।।

इत्यादिवचनाच्च । वा अथवा कृतकामनः सन्कुरु

उपोषणं जागरणं पितृनुद्दिश्य तर्पणं ।
तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभि ।।

इत्यगस्त्यसंहितोक्तेः ।

सर्वेषामप्ययं धर्मो भुक्ति मुक्त्येकसाधनः ।
अशुचिर्वा शुचिर्वापि कृत्वेदं व्रतमुत्तमम् ।।
पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः ।।

इत्यादिवचनाच्च रामं प्रपूज्य रात्रौ जागरणं च कुरु ।

उपोष्याष्टसु यामेषु पूजयित्वा यथाविधिः ।
उपोषणं जागरणं पितृनुद्दिश्य तर्पणम् ।।

इत्यादि वचनात् विप्राय ब्राह्मणाय वसु देहि, वित्तशाठ्यं नास्तिवित्तमिति न ब्रूहि इति दत्वा विधानेन दद्याद्वै दक्षिणां भुवमिति वचनात् । किं फलमित्यत आह– आशु शीघ्रं पातकशतं पापसङ्घक्षयं नाशं गन्ता यास्यति

ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ।।

इति वचनात् ।।६६।।

मध्याह्नतो यदि भवेदथवापराह्ण
प्रान्ते स्थितापि नवमी फलदादिमैव ।
नोचेत्परैव दशमी सहितापि कार्या
पुजाद्युपोषणविधाविषशुक्लयाता ॥७०॥

मध्याह्न इति । इषशुक्लयाता आश्विनशुक्लपक्षस्था नवमी मध्याह्नत मध्याह्नकालात् परं स्थिता यदि भवेत् तदाऽऽदिमैव पूर्वान्वितैव फलदा ।

श्रावणी दुर्गनवमी दुर्गा चैव हुताशनि ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्वलेर्दिनम् ॥

इति वचनात् ।

न कुर्यान्नवमी तात दशम्यां तु कदाचन ॥

इति स्कान्दे निषेधात् अथ यदि अपराह्णप्रान्ते अपराह्णकालान्तेपि यदि भवेत् तदापि आदिमैव तस्मादेव वचनात् । सायन्तनं तूत्तरया तद्वन्यूनता तु नविध्यत इति वचनात् चेत् यदि तथाविधापि पूर्वदिने न तदा दशमी सहितोपि पूजाद्युपोषणविधौ कार्या ।

अश्वयुक् शुक्लनवमी मुहूर्त्त वा कला यदि ।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ॥
सूर्योदये परं रिक्ता पूर्णा स्यादपरे यदि ।
वलिदानं प्रकर्त्तव्यं तत्र देश सुखावहम् ॥
वलिदाने कृतेऽष्टम्यां पुत्रभङ्गो भवेन्नृपः ॥

इति वचनद्वयमालक्ष्य पूजाद्युपोषणविधाविति । अत्र होमवलिदानवचनाभावाद्धोमवल्यादि तु परत्रैवेत्याशयः । पूजाद्युपोषणविधौ न तु होमवलिदानादिष्वित्यर्थः ॥७०॥

छागादयो वलिविधावथवाऽऽसमर्थै
कूष्माण्डविल्वफल पूरफलेक्षुदण्डाः ।
योज्याः सहस्रशत सप्तशतीविधानं
होमो दशांशविधिना निशिजागरश्च ॥७१॥

छागादय इति । वलिविधौ वलिदानविधौ छागादयो विधेया अथवा असमर्थै छागादिवलिदानादक्षैः कुष्माण्डविल्वफल-पूरफलेक्षुदण्डाः योज्या ।

छागाभावे तु कूष्माण्डं श्रीफलं च मनोहरम् ।
वस्त्रसंवेष्टितं कृत्वा छेदयेत् क्षुरिकादिने ॥

इति वचनात्

कूष्माण्डमिक्षुदण्डं च मांसं सारसमेव च ।
एते वलिसमाः प्रोक्तास्तृप्तौ छागसमा स्मृतः ॥

इति वचनात् सहस्त्रशतसप्तशतीविधानम्

सहस्त्रचण्डी विधिवत् श्रृणु विष्णोर्महामते ।
राज्यभ्रंशे महोत्पाते जनमारे महाभये ।
अश्वमारे हस्तिमारे परचक्रभये तथा ॥
इत्यादि विविधे दुःखे क्षयरोगादिजे भये ।
सहस्रचण्डिकापाठं कुर्याद् वा कारयेत्तथा ॥
सर्वोपद्रवनाशार्थे शतचण्डी समारभेत् ॥

इत्यादि वचनदर्शनात् दशांशविधिना यावच्चण्डीपाठ दशांशविभागेन होमो विधेयः ।

पायसं सर्पिषायुक्तं तिलैः शुक्लैर्विमिश्रितम् ।
होमयेद् विधिवद् भक्त्या दशांशेन नृपोत्तम ॥

इति वचनात् । रात्रौ जागरो जागरणं च कार्यम्

व्रतं च जागरश्चैव नवम्यां विधिवद् वलिः ॥

इति देवीपुराणात् ॥७१॥

स्यात्पारणा तु सुत सर्वमते दशम्यां
लोहाभिसारिकविधेस्तु भवेन्नवम्याम् ।
तस्यां न सम्भवति सूतकपातशंका
दानं विधेयमुचितं द्रविणानुसारात् ।।७२।।

स्यादिति । सुत हे तात पारणा नवरात्रोपोषित पारणा तु दशम्यां सर्वमते सर्वग्रन्थमते । दशम्यां पारणं कुर्यादिति वचनात् ।

दशम्यां पारिता देवी कुलनाशं करोति वै ।

इति वचनं तु नवमीं वृध्दौ दिनद्वये नवमी सत्वे दिनद्वयं उपोष्य नवम्यामेव पारणं कुर्यादिति ज्ञापकं लोहभिसारिकविधेस्तु नवम्यां भवेत् ।

नवम्यां पारणं कुर्यात् दशमी मिश्रिता न चेत् ।।

इ ति वचनात्

जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
लोहाभिसारिकं कर्म कारयेद्यावदष्टमी ।।

इति अष्टमीपर्यन्तमेवोक्तेश्च तस्यां नवरात्रोपोषित-पारणायां सूतकपातशङ्का सूतकपाते पारणाभावशङ्का नभवति ।

कामोपवासे प्रक्रांन्ते त्वन्तरामृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ।।

इति कौर्मोक्तेः ।

व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे ।
प्रारम्भे सूतकं नस्यादनारम्भे तु सूतकम् ।।

इति विष्णुवचनाच्च । आशौचमध्येऽपि तत्कर्तव्यतावगतेः व्रतस्य पारणान्तत्वात् ।

सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः ।।

इति वचनाच्च द्रविणानुसारात् वित्ताशाठ्येन उचितं च विधेयम् । दानं दद्याच्च शक्तित इति तत्रैवोक्तेः ।।७२।।

आरभ्य कार्तिकिकमासि सिते नवम्यां
कार्यं दिनत्रितयमर्चनमच्युतस्य ।
वैवाहिकेन विधिना तुलसीयुतस्य
पूर्वाह्ण एव समये प्रतिमा तु हेम्नः ।।७३।।

आरभ्येति । कार्तिकिकमासि कार्तिके मासे सिते शुक्लपक्षे नवम्यामारभ्य दिनत्रितयं अच्युतस्यार्चनं विष्णोः पूजनं कार्यं किं केन विधिनेत्यत आह वैवाहिकेन विधिना, किंभूतस्येत्यत आह तुलसीसहितस्य प्रतिमा तु हेम्नः सुवर्णस्य कार्या ।

कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः ।
हरिं विधाय सौवर्णं तुलस्या सहितं विभुम् ।।
पूजयेद्विधिवद् भक्त्या व्रती तत्र दिनत्रयम् ।
एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ।।

इति हेमाद्रौ पाद्मोक्तेः । कस्मिन् समय इत्यत आह – पूर्वाह्ण एव समये

पूर्वाह्णे तु सदा कार्या शुक्लामनयुगादयः ।
दैवकर्मणि पत्रे च कृष्णे चैत्र पराह्णिका ।

इति वहुलवचनादियं युगादिरित्यर्थः ।।७३।

पूर्वान्विता अधिकपुण्यफला नवम्यः
कृष्णाः सिता मुनिपुराणमतेपि सर्वाः ।
कार्या सुत व्रतिभिरिष्टसमृद्धिकामै-
र्भोज्या न तासु खलु सत्यमुलावजातिः ।।७४।।

पूर्वान्विता इति । कृष्णपक्षस्थाः सर्वा नवम्य तथा सिताश्च मुनिपुराणमतेपि पूर्वान्विता अधिकपुण्यफलाः कार्याः कैरित्यत आह, इष्टमृद्धिकामैर्न्रतिभिः सुत हे तात तासु कृष्णा शुक्ला-नवमीषु खलु सत्यं अलावुजातिर्न भोज्या कूष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा, तैलं चामलकं दिवं प्रवसता शीर्ष कपालेति संग्रहश्लोकोक्तेः ।।७४।।

ज्येष्ठे सिता तु दशमी दशयोगयुक्ता
विद्वज्जनैर्दशहरेत्यभिधीयमाना ।
योगोस्ति यत्र बहुभिः सुत सा विधेया
मासे मलेऽपि फलदा दशभिर्हि योगैः ।।७५।।

अथ दशमी निर्णीयते । ज्येष्ठ इति । सुत हे पुत्र ज्येष्ठे ज्येष्ठमासे सिता शुक्ला दशमी तु दशयोगयुक्ता सती विद्व-ज्जनैर्दशहरेत्यभिधीयमाना भवतीति शेषः ।

ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दश पापानि तस्माद्दशहरा स्मृताः ।।

इति ब्राह्मोक्तेः ।

दशम्यां शुक्लपक्षे वै ज्येष्ठे मासि कुजेऽहनि ।
अवतीर्णा ह्यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ।।
हरते दशपापानि तस्माद्दशहरा स्मृताः ।।

इति वाराहोक्तेश्च यत्र बहुभिः योगोऽस्ति सा मलेपि मासे दशभिर्योगैः फलदा हि भवति श्रुद्धे मलेऽपि मासे यत्र योगबाहुल्यं सैव कार्येत्यर्थः, 'दशहरासु नोत्कर्ष चतुर्ष्वपि युगादिषु इति हेमाद्रौ ऋष्यश्रृङ्गोक्तेः ।७५।

सूर्यो वृषे हरिजभे च विधुर्युवत्यां
पक्षे सिते च दशमी व्यतिपातहस्तौ ।
आनन्दयोगबुधवारगराभिधाना
योगा दशैव दश पापहरा भवन्ति ।।७६।।

दशयोगानाह सूर्येति । वृषे सूर्यः १, हरिणभे मृगशिरसि २, युवत्यां कन्यायां च विधु ३, पक्षे सिते शुक्ले दशमी ५, व्यतिपातहस्तौ आनन्दयोग ८, बुधवार ६, गराभिधानाः १०, योगा दशैव दशपापहरा भवन्ति ।

ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतिपात गरानन्दे कन्याचन्द्रे वृषे रवौ ।।
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।।

इति स्कान्दात् ।।७६।।

पूर्वं निमज्य दशवारमघापहायां
कृष्णैर्दशप्रभृतिभिश्च तिलैर्घृतेन ।
पिण्डान्दशैव गुडशक्तुभिरंग दत्वा
तामर्चय द्युसरितं विविधोपचारैः ।।७७।।

पूर्वमिति । अंग हे पुत्र पूर्वं अघापहायां पापहरायां गंगायां दशवारं निमज्य दशप्रभृतिभिः कृष्णै तिलै घृतेन सह गुडसक्तुभिः पिण्डं दत्वा तां द्युसरितं गंगां विविधोपचारैः षोडशाद्युपचारैरर्चय पूजय ।

निशायां जागरं कृत्वा तमुपोष्य च भक्तितः ।
पुष्पैः गन्धैश्च नैवेद्यैः फलैश्च दशसंख्यया ।।
तथा दीपैश्च ताम्बूलैर्पूजयेत् श्रद्धयान्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वोभिधानतः ।।

दशप्रसृतिकृष्णाश्च तिलान्सर्पिश्च वै जले ।
सक्तुपिण्डान् गुडपिण्डान् दद्याच्च दशसंख्यया ।।

ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ।
संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा ।
अथ तत्राप्यशक्तैश्चेल्लिखेत् पिष्टेन वै भुवि ।।

वक्ष्यमाणेन मन्त्रेण कुर्यात्पूजां विशेषतः ।
नारायणं महेशं च ब्रह्माणं भास्करं तथा ।।

भगीरथं च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् ।।

दशप्रस्थान् तिलान्दद्याद्दशविप्रेभ्य एव च ।
दशप्रस्थान् यवान्दद्याद्दशसंख्यगर्वास्तथा ।।

प्रस्थः षोडशपलानि पलं तु मुष्टिमात्रम् ।
मत्स्यकच्छपमण्डूकमकरादि जलेचरान् ।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ।।

तदभावे पिष्टमयानभ्यर्च्य कुसुमादिभिः ।
गङ्गायां प्रक्षिपेदाज्यं दीपांश्चैव प्रवाहयेत् ।।
पुष्पाद्यैः पूजयेद् गङ्गां मन्त्रेणानेन भक्तितः ।।

ॐ नमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नमः ।
इति मन्त्रं तु यो मर्त्यो दिने तस्मिन् दिवानिशं ।
जपेत् पंचसहस्राणि दश धर्माँल्लभेदिह ।।७७।।

देवीं विसर्जय सुतेषसिते दशम्यां
प्रातः समर्च्य गिरिजां सहगीतवाद्यैः ।
याहि त्वमद्य गिरिजे प्रतिगृह्य पूजां
स्वं गेहमम्ब पुनरागमनाय चेति ।।७८।।

देवीमिति । सुत हे पुत्र इषसिते आश्विनशुक्ले पक्षे दशम्यां गिरिजां दुर्गां समर्च्य अद्येदानीं गिरिजे अम्ब पूजां प्रतिगृह्यादाय पुनरागमनाय च स्वं निजं गेहं आलयं त्वं याहीति प्रार्थ्य गीत-वाद्यैः सह देवीं विसर्जय ।

ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
सम्प्रेषणं तु कर्तव्यं गीतवादित्रनिस्वनैः ।।
रूपं देहि यशो देहि भगं भवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ।।

महिषघ्नि महामाये चामुण्डे मुण्डमालिनी ।
आयुरारोग्यमैश्वर्यं देहि देवी नमोस्तु ते ।।

इति संप्रार्थ्य देवीं तु तत उत्थापयेद् बुधः ।
उत्तिष्ठ देवी चण्डेशि शुभां पूजां प्रगृह्य च ।।

कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।।

व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जलेत्विह ।

इत्युत्थाप्य जलं नीत्वा-

दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय च ।।

इमां पूजां मया देवि यथाशक्त्यूपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्थानमनुत्तमम् ।।
इति जले प्रवाहयेत् इत्येवं विसर्जयेत्यर्थः ।।७८।।

पत्राक्षतादि सकलं च जले प्रवाह्य
देयानि वस्त्रयुगलानि सभूषणानि ।
कन्याजनाय धनमुत्सृज भूसुरेभ्यः
प्राप्तास्यभीष्टमचिरादपि तत्प्रसादात् ।।७९।।

पत्रेति । पत्राक्षतादि सकलं च जले नद्यादौ प्रवाह्य वाहयित्वा कन्याजनाय सभूषणानि वस्त्रयुगलानि देयानि ।

वस्त्रादिभूषणं दद्यात्कुमारीभ्यः सदक्षिणम् ।

इति वचनात् । भूसुरेभ्यो धनमुत्सृज ।

हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो दक्षिणां क्रमात् ।
कपिलांगां मणिं नीलं स्वेताश्वं छत्रचामरे ।।
अभिषेकं ततः कुर्युः यजमानस्य ऋत्विजः ।।

इति तत्प्रसादाद्दुर्गाप्रसादादचिरादपि शीघ्रमेवाभीष्टं प्राप्तासि लप्स्यसे एवं कृतेमरेशान सर्वसिद्धि प्रजायतेति वचनात् ।।७९।।

कार्येयमात्मज बुधैर्दिवसान्तयाता
नन्दान्विता यदि दिनद्वितयेऽपि सैव ।
पूर्वान्वितैव सफला यदि सापराह्ला
योगत्रयं भवति यत्र तदैव पुण्यम् ।।८०।।

कार्येति । आत्मज हे पुत्र इयं दशमी दिवसान्तया वा सायाह्नव्यापिनी सती नन्दान्विता एकादशीयुता कार्या । यदि दिनद्वितयेपि दिवसान्तयाता तदापि सैव नन्दान्वितैव अपराह्णव्याप्तेराधिक्यात् सफला ।

आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः ।
एकादश्यां न कुर्वीत पूजनं चापराजितम् ।।

इति वचनात् ।

दशम्यां तु नरैः सम्यक् पूजनीया पराजिता ।
ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ।।

इति वचनाच्च यत्र योगत्रयं भवति तदैव पुण्यं भवति योगत्रयं दशमी श्रवणं विजयकालः ।

उदये दशमी किञ्चित्संपूर्णैकादशी यदि ।
श्रवणर्क्ष्यं तदा काले सा तिथिर्विजयाभिधा ।।

इति वचनात् ।।८०।।

पूजां विधेहि शिवदिश्यपराजितायाः
क्षेमाय वत्स विजयाय च पश्य सीमाम् ।
पट्टाभिषेचनविधावपि सैव कार्या
सा दुर्लभा जगति सश्रवणा पराह्णा ।।८१।।

पूजामिति । वत्स हे पुत्र क्षेमाय शिवदिशि ईशानदिशायां अपराजितायाः पूजां विधेहि ।

दशम्यां तु नरैः सम्यक् पूजनीया पराजिता ।
ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ।

इति वचनात्

या पूर्णा नवमी युक्ता तस्यां पूज्या पराजिताः ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ।।

इति वचनाच्च । च पुनः विजयाय सीमां पश्य ।

श्रवणर्क्षे च पूर्णाया काकुत्स्थ प्रस्थितो यतः ।
उल्लङ्घयेयुस्सीमानं तद्दिनर्क्षे ततो नराः ।।

इति वचनात् पट्टाभिषेचनविधावपि सैवा पराह्णयातैव एकादश्यां न कुर्वीत इत्यादिवचनात् । सा सश्रवणापराह्णा श्रवणयुक्तोऽपराह्णो यस्या सा तथाविधा दशमी जगति दुर्लभा भवति ।

यत्रापराह्णदशमी श्रवणर्क्षसमन्विता ।
सा दुर्लभतरा लोके राज्ञः पट्टाभिषेचने ।।

इति वचनात् ।।८१।।

नीराजनान्तविधिनाङ्ग शमीद्रुमस्य
पूजां विधाय विदधीत जयाय यात्राम् ।
जित्वाहवे रिपुकुलानि महाबलानि
वेश्माभ्युपेष्यति नृपो विजयश्रियाढ्यः ।।८२।।

नीराजनेति । अंग हे पुत्र नीराजनान्तविधिना शमीद्रुमस्य पूजां विधाय जयाय यात्रां विदधीत ।

शमीयुक्तं जगन्नाथ भक्त्या नामभयङ्करं ।
अर्चयित्वा शमीवृक्षमर्चयेच्च ततःपुनः ।।

मन्त्रस्तु-

अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशनीं धन्यां प्रपद्येहं शमीं शुभाम् ।।इति ।।
शमीं शमयते पापं शमीलोहितकण्टकां ।
धारिण्यर्जुनवाणानां रामस्य प्रियवादिनीम् ।।
करिष्यमाणयात्राया यथाकाल सुखं मया ।
तत्र निर्विघ्नकर्त्रीत्वं भव श्रीरामपूजिते ।।
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ।।
ततो भूषणवस्त्राद्यैर्धारयेत्स्वजनैः सह ।।

इति । नीराजनं तु कृत्यरत्ने

चतुरङ्गबलं मह्यं निररिष्टं व्रजत्विह ।
सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात् सुरेश्वरी ।।
कृत्वा नीराजनं राजवलवृद्ध्यै यथाक्रमम् ।
शोभनं खञ्जनं पश्येत् जलगोष्ठस्य सन्निधौ ।।

इति करिष्यमाणयात्राया इति वचनात् यात्रायां विधेहीत्युक्तं किं फलमित्यत आह-आहवे संग्रामे महावलानि रिपुकुलानि जित्वा विजयश्रियाढ्यो युक्तः सन् नृपः वेश्म स्वगृहं अभ्युपेष्यति प्राप्स्यति ।।८२।।

पूर्वान्वितैव दशमी तु सितासितापि
कार्येष्टकालमनुपेतवती यदि स्यात् ।
कार्या परापि सुत सौदयिकी न तस्यां
भुञ्जीत कर्हिचन सर्वमते पटोलम् ॥८३॥

पूर्वान्वितेति । दशमी तु सितासितापि शुक्ला कृष्णापि पूर्वान्वितैव कार्या, दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तमैः आपस्तम्बोक्तेः । यदि दशमी कालमनुपेतवती अव्याप्तवती स्यात् तदा सा औदयिकी उदयकालव्यापिनी परापि कार्या ।

सम्पूर्णा दशमी कार्या पूर्वया परयाथवा ॥

इति अङ्गिरसोक्तेः । सुत हे तात तस्यां दशम्यां उभयत्र स्थितायां सर्वमते कर्हिचन कदाचिदपि पटोलं न भुञ्जीत ।

कूष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा ।
तैलं चामलकं दिवं प्रवसता शीर्षं कपालान्त्रकम् ॥

इति संग्रहश्लोकोक्तेः ॥८३॥

एकादशी तु सकला द्विविधोपवासा
शास्त्रे निषेधनपरव्रतरूपभेदात् ।
सापि द्विधा भवति वत्स हि नित्यकाम्य-
भेदादशेषमनुजैरपि सेवनीया ॥८४॥

सुरासुरनमन्मौलिः पीडिताङ्घ्रिसरोरुहाः ।
मङ्गलायास्तु लोकानां सर्वदा सर्वमङ्गला ॥

अथैकादशी निर्णीयते एकादशीति । वत्स हे पुत्र एकादशी तु सकला शास्त्रे निषेधनव्रतरूपभेदात् द्विविधोपवासा भवति तत्राद्या–

न शङ्के न पिबेत्तोयं न भक्षेत्कूर्मसूकरौ ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।।

इति देवलोक्तेः ।

गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च ।

एकादश्यामिति पूर्ववत् इति अग्निपुराणाच्च निषेधनपरा । द्वितीया तु–

प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि ।
दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतम् ।।

इत्यादिना व्रतरूपा सापि नित्यकाम्यभेदादशेषमनुजैरपि सेवनीया भवति । नित्या यथा।

उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि ।

इति गारुडोक्तेः ।

पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ।

इति नारदोक्तेश्चेति काम्या यथा–

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।।

इति कौर्म्यादिषु फलश्रुतेरिति ।।८४।।

नित्या सितैव गृहिणां तु न वत्स कृष्णा
काम्यैव सापि शुचिकार्तिकमध्यगैव ।
सेव्योपवासविधिना सुत नेतरासु
नक्तादिभिर्हरितिथिः परिपालनीया ।।८५।।

नित्येति । वत्स हे पुत्र गृहिणां गृहस्थानां तु सिता शुक्लैव नित्या भवति न कृष्णा ।

एकादश्यां न भुञ्जीथः पक्षयोरुभयोरपि ।
वनस्थ यदि धर्मोयं शुक्लामेव सदा गृही ।।

इति देवलोक्ते:

संक्रान्त्यामुपवासं च कृष्णैकादशीवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही ।।

इति नारदोक्तेश्च ।

विधवाया यतेश्चैव वन(स्थ)स्यैकादशीद्वये ।
उपवासौ गृहस्थस्य शुक्लायामेव पुत्रिण: ।।

इति कालादर्शोक्तेश्च किन्तु काम्यैव ।

पुत्रवांश्च सभार्यश्च वन्धुयुक्तस्तथैव च ।
उभयो पक्षयो: काम्यव्रतं कुर्यात्तु वैष्णवम् ।।

इति नारदोक्ते: । सापि कृष्णापि शुचिकार्तिकमध्यगैव आषाढकार्तिकमध्यस्थैव न सेव्या नेतरेत्यर्थ: ।

शयनी वोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ।।

इति पाद्मोक्ते: । गृहीणां तु इति वचनात् वैष्णवानां तु द्वेपि नित्ये । यथा शुक्ला तथा कृष्णा द्वादशी मे सदा प्रिया इति वचनात् ।

सोमसूर्यग्रहौ पुण्यौ यथैव मुनिभि: स्मृतौ ।
तथा सितासिते पुण्ये द्वादश्यौ विष्णुतुष्टये ।।

इति कूर्मपुराणाच्च ।

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथा सिता ।।

इति वचनाच्च । सुत हे पुत्र इतरा तु अन्या कृष्णा तु न गृहीभिर्न सेव्येत्यर्थ: नान्या कृष्णा कदाचनेति वचनात् । शयनी-वोधनीमध्यस्था भिन्ना तु काम्यापि नेति भाव: । तस्यां कृष्णायां किं विधेयमित्यत आह नान्या कृष्णा हरितिथिरेकादशी नक्तादि-भिर्व्रतै: परिपालनीया ।

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन न निर्द्वादशिको भवेत् ।।

इति वचनात् ।

उपवासनिषेधे तु भक्ष्यं किञ्चित्प्रकल्पय ॥

इति वचनाच्च ॥८५॥

वेधो द्विधा भवति सर्वमते दशम्याः
सूर्यारुणोदयवशादरुणोदयं च ।
दण्डैश्चतुर्भिरिह शास्त्रविदो वदन्ति
पञ्चाशतः षडधिकात्परतः प्रवेशे ॥८६॥

वेध इति । सर्वमते दशम्या वेधः सूर्यारुणोदयवशात् सूर्योदयारुणोदयवशेन द्विधा द्विविधो भवति । सूर्योदयवेधोरुणोदयवेधश्चेति । सूर्योदयवेधस्य सुखवौध्यत्वादरुणोदयवेधं स्पष्टयति अरुणोदयञ्चेति । अरुणोदयं च इह शास्त्रविदश्चतुर्भिर्दण्डैर्घटिकाभिः षडधिकात्पंचाशतः परतः षट्पंचाशत्तमाद्दण्डात्परतो दशम्याः प्रवेशे वदन्ति । चतस्रो घटिकाः प्रातररुणोदय निश्चय ।

इति ब्रह्मवैवर्तात् ।

षट्पंचाशत्तमाद्दण्डात्परतोपि यदा भवेत् ।
दशमी तु तदा वेधो ह्यरुणोदयसंज्ञितः ॥

इति पुराणान्तराच्च ॥८६॥

विष्णुप्रियास्तमरुणोदयवेधयोगम्
स्मार्तास्त्यजन्ति तपनोदयवेधमेव ।
तस्मात्त्वमात्मज गृही त्यज यत्नतस्ताम्
सूर्योदये तु दशमीतिथिवेधयुक्ताम् ॥८७॥

विष्णुप्रिया इति । आत्मज हे पुत्र विष्णुप्रिया वैष्णवास्तमरुणोदयवेधयोगं त्यजन्ति सूर्योदयवेधस्य का कथेति भावः ।

दशमी शेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशी व्रतम् ।।

इति वचनात् ।

लववेधेपि विप्रेन्द्र दशम्यैकादशीं त्यजेत् ।
सुरायां विधिना स्पृष्टं गङ्गाम्भ इव निर्मलम् ।।

इति नारदीये वचनात् । स्मार्ताः स्मृतिपरायणाः तपनोदयवेधमेव त्यजन्ति नारुणोदयवेधं ।

प्रथमेहनि सम्पूर्णा व्याप्त्याहोरात्रसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव सा ।
पूर्वाग्राह्या गृहस्थैश्च यतिभिश्चोत्तराविभो ।।

इति स्कान्दोक्तेः ।

एकादशी विवृद्धा चेत् शुक्ले कृष्णे विशेषतः ।
उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ।।

इति प्रचेतसोक्तेश्च । तस्मात् कारणात् तं गृही गृहस्थः सूर्योदये दशमीतिथिवेधयुक्तां तामेकादशीं यत्नतस्त्यज तस्यां नोपवसेत्यर्थः ।।८७।।

पूर्वेद्युरीदृगरुणोदय वेधयुक्ता-
प्येकादशी परदिने घटिकामुपेता ।
भद्रा न चेत् क्षयवशादपि सा परैव
कार्या हरिव्रतवता गृहिभिस्तु पूर्वा ।।८८।।

पूर्वेद्युरिति । सा एकादशी पूर्वेद्युरीदृगरुणोदयवेधयुक्ता चतुर्दण्डात्मकारुणोदयवेधयुता सत्यपि परदिनेपि घटिकामुपेता एकां घटीं प्राप्तवती भवति । क्षयवशाद्भद्रा द्वादशी न चेत् अपरदिने द्वादशी नष्टा चेदित्यर्थः यथा द. ५८ ए. ६० पू. १ त्र. ५८ तदापि हरिव्रतवता विष्णुभक्तेन परैव घटिकात्मिकैव

कार्या अरुणोदयविद्धा निषेधात् । गृहिभिस्तु पूर्वा षष्ठिदण्डात्मिका कार्या सूर्योदये दशम्यायुतत्वाभावात् त्रयोदश्यां पारणानिषेधाच्च

प्रथमेहनि सम्पूर्णा व्याप्त्याहोरात्रसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव सा ।।
पूर्वा ग्राह्या गृहस्थैश्च यतिभिश्चोत्तराविभो: ।

इति स्कान्दात् ।

अविद्धापि च विद्धा स्यात्परतो द्वादशी यदि ।
विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत् ।।

इति पाद्मोक्तेश्च ।

त्रयोदश्यां न लभ्येत द्वादश्यां यदि किंचन ।
उपोष्यैकादशी तत्र दशमी मिश्रितापि चेत् ।।

इति स्कान्दाच्च । इदं वचनद्वयं गृहस्थपरं परतो द्वादशी यदीति वचनावलोकनात् वैष्णवानां तु त्रयोदश्यामपि पारणा न दुष्यते ।

दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते ।
शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभि: ।।

इति व्यासोक्ते: ।

एकादशी यदा ब्रह्मन् दिनक्षयतिथिर्भवेत् ।
द्वादशी तत्र चोपोष्या त्रयोदश्यां तु पारणम् ।।

इति वचनाच्च ।।८८।।

पूर्णा यदा तु दशमी परतोपि किञ्चि-
देकादशी तु न परेहनि किन्तु भद्रा ।
तत्रापि वत्स दशमीसहिता गृहस्थै:
कार्या हरिव्रतवता तु परैव कार्या ।।८९।।

पूर्णेति । वत्स हे पुत्र दशमी पूर्णा सती परतोपि परदिनेपि किञ्चित् लवात्मिका भवति एकादशी तु न, परदिने किन्तु

भद्रा द्वादशी एकादशी नष्टेत्यर्थः । तत्रापि गृहस्थैर्दशमीसहिता कार्या हरिव्रतवता तु परैव कार्या ।

दशम्यां मिश्रिता पूर्वा द्वादश्यां च विलुप्यते ।
एकादश्यां तदा ब्रह्मन्नुपवासः कथं भवेत् ।।

इति प्रश्ने

शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकांक्षिभिः ।
सकामैर्गृहिभिः पूर्वा विद्धापीति विनिश्चयः ।।

इति वचनात्

त्रयोदश्यां यदा न स्याद्द्वादशी घटिकाद्वयम् ।
दशम्यैकादशीमिश्रा सैवोपोष्या सदा तिथिः ।।

इति वचनाच्च ।

एकादशी यत्र नष्टा द्वादशी वा क्षयं गता ।
दशम्यैकादशी कार्या वेधदोषो न विद्यते ।।

इति वचनाच्च ।

दशमी शेषसंयुक्ताप्युपोष्यैकादशी तदा ।
त्रयोदश्यां यदा नस्यान्मुहूर्त्तं द्वादशी यदा ।।

इति विष्णुरहस्ये वचनाच्च ।

अत्र कार्येत्यत्र दशम्यैकादशी विद्धेत्यादि वचनं नक्तव्रते अवगन्तव्यम् हरिव्रतवता विष्णुभक्तेन तु परैव द्वादश्येव कार्या शुद्धैव द्वादशी राजन्नित्यादि पूर्वोक्तवचनात् ।।८९।।

नन्दारुणोदयहता यदि वत्स भद्रा
वृद्धा सती परदिनेपि तथास्ति किञ्चित् ।
तत्रापि सैव यतिभिर्गृहिभिस्तु नन्दा
कार्या न संशयमुपैहि मते मुनीनां ।।९०।।

नन्देति । वत्स हे पुत्र यदि नन्दा एकादशी अरुणोदयहता भवति भद्रा द्वादशी वृद्धा सती परतोपि परे दिनेपि तथा किञ्चिदस्ति यथा-द. ५८ पू. ५९. द्वा. ६०।१ तत्रापि यतिभिः सैव द्वादश्येव अरुणोदयविद्धानिषेधात् परदिने द्वादशी सद्भावाच्च गृहिभिस्तु नन्दा एकादशी कार्या सूर्योदयवेधस्यैव त्याज्यत्वात् ।

द्वादशीमात्रवृद्धौ तु शुद्धा विद्धे व्यवस्थिते ।
शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृश ।।

इति वचनात् गृहिणां त्वरुणोदयविद्धापि शुद्धा सूर्योदयवेधस्यैव त्याज्यत्वात् । वैष्णवैस्तु अरुणोदयवेधस्यापि त्याज्यत्वादुत्तरैव गृहिणां विद्धा तु द. १, द्वा. ६०।१ तत्र दशमी विद्धा त्याज्या द्वादश्युपोष्येति द्वादशीमात्रवृद्धौ तु इत्यस्यार्थः ।

न चेदेकादशी विष्णौ परतो द्वादशी यदि ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ।।

इति नारदोक्तेः । मुनीनां मते संशयं नोपैहि न विधेहि विचार्योक्तमस्तीति भावः ।।९०।।

सूर्योदये तु नवमी दशमी च नष्टा
नन्दा परेद्युररुणोदयवेधयुक्ता ।
तत्रापि वत्स गृहिभिस्तु न जातु भद्रा-
नं दैववित्त सुत सौख्यविनोदहेतुः ।।९१।।

सूर्योदय इति । वत्स हे पुत्र सूर्योदये तु नवमी च पुनः दशमी नष्टाः परेद्यु नन्दा एकादशी अरुणोदयवेधयुक्ता भवतीति शेषः । न २ ए ५८ तत्रापि गृहिभिस्तु जातु कदाचित् भद्रा द्वादशी न नोपोष्येत्यर्थः । पूर्वामुपवसेद्गृहीति वचनात् वित्तसुतसौख्यविनोदहेतुर्नन्दैव एकादश्यैव अरुणोदयवेधस्य निषेधाभावात् ।।९१।।

सूर्योदये तु दशमी परतस्तु नन्दा
पूर्णा परेह्ननि न किञ्चिदुपैति वत्स ।
भद्रा यदि क्षयमिता गृहिभिस्तदा तु
नक्तं विधेयमितरैस्तु न वर्जनीया ।।९२।।

सूर्योदय इति । वत्स हे पुत्र सूर्योदये तु दशमी तु पुनः परतस्तदनन्तरं सूर्योदयानन्तरमित्यर्थः नन्दा पूर्णा परेह्ननि च प्रातः कालेपि किञ्चित् कालादि उपैति यदि भद्रा द्वादशी क्षयमिता नष्टा, यथा द २. ए० परत्र ५८ तदापि गृहिभिर्नक्तं विधेयम्

दशम्यैकादशी विद्धा द्वादशी च क्षयं गता ।
नक्तं तत्र प्रकुर्वीत नोपवासो विधीयते ।।

इति वचनात्, इतरै वैष्णवैस्तु न वर्जनीयो द्वादश्युपाष्येत्यर्थः

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवासं प्रकुर्वीत त्रयोदश्यां तु पारणम् ।।

इति वचनात् ।।९२।।

एकादशी च दशमी च यदा तु वृद्धा
द्वादश्युपोषणमुशन्ति हि विष्णुभक्ताः ।
वृद्धा यदा तु नवमी दशमी च नष्टा
नन्दारुणोदयहतास्ति तदापि भद्राम् ।।९३।।

एकादशीति । यदा तु एकादशी च दशमी च वृद्धा वृध्दि गता द्वे तिथिवृद्वे त्यर्थः द ६० ए ६० तदा हि विष्णुभक्ताः द्वादश्युपोषण-मुशन्ति द्वादश्यां उपवासं कुर्वन्ति तत्राप्यरुणोदयवेधस्य व्याप्तिस-त्वात् विष्णुभक्ता इति वचनाद् गृहिणस्तु पूर्वस्यामेकादश्यामुपवासं कुर्वन्ति सूर्योदये दशमीतिथेरभावात् । यदा तु नवमी वृद्धा

दशमी च नष्टा नन्दा एकादशी अरुणोदयहता भवति यथा– नं ६०/० ए ५६ तदापि भद्रां द्वादशीमुशन्ति द्वादश्यामुपवसन्तीत्यर्थः ।

तत्राप्यरुणोदयवेधस्य व्याप्तित्वात् तत्रापि गृहिणस्तु नन्दामुशन्ति तद्वेधस्य निषेधाभावात् ।।९३।।

दण्डास्त्रयो यदि तिथित्रितये तु नन्दा
स्मार्त्तैरपीह सुत नित्यमुपोषणीया
सूर्योदये तु दशमी क्षयमेति नन्दा
स्यान्नक्तमेव गृहिणां तु परेतरेषाम् ।।९४।।

दण्डा इति। सुत हे तात यदि तिथित्रितये दशम्यैकादशी द्वादशीषु त्रयो दण्डास्त्रयस्त्रय इत्यर्थः भवन्ति द ३, ए ३, द्वा ३, तदा इह स्मार्त्तै अपि शब्दाद् वैष्णवैरपि नन्दा एकादशी नित्यमुपोषणीया सूर्योदये एकादशी सद्भावात् किञ्चिद्विद्धायामपि सत्यां परतो द्वादशी सद्भावे

महाहानिकरी ह्येषा द्वादशी लङ्घिता नरैः

इति तस्या उल्लंघने दोषश्रवणात् अविद्धापि च विध्दा स्यादित्यादि पूर्वोक्तवचनात्

त्रयोदश्यां न तत् कुर्याद् द्वादशद्वादशीक्षयात् ।

इति वचनाच्च तु पुनः सूर्योदये दशमी नन्दा एकादशी क्षयमेति द, २, द्वा ५८ तदापि गृहीणां नक्तं स्यात्

एकादशी दिनक्षये उपवासं करोति यः ।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा ।।

इति वचनात्

दशम्यैकादशी विद्धा द्वादशी च क्षयं गता ।
नक्तं तत्र प्रकुर्वीत नोपवासो विधीयते ।।

इति वचनात् चकारादेकादश्यपि क्षयं गतेत्यर्थ इतरेषां वैष्णवानां तु परा पूर्वोक्तवचनात् उपवासनिषेधाभावादुपोष्येत्यर्थः ॥९४॥

नन्दारुणोदय हतापि यदा तु वृद्धा
किञ्चित्परेद्युरपि वत्स तदा तु सर्वैः
पूर्वां विहाय हि परा घटिकात्मिकापि
कार्या परत्र यदि किञ्चिदुपैति भद्रा ॥९५॥

नन्देति । वत्स हे पुत्र नन्दा एकादशी अरुणोदयहता तद्वेधयुक्तापि यदा तु वृद्धा षष्ठी दण्डात्मिका सती परेद्युरपि किञ्चित् व्याप्तेति शेषः ! भद्रा द्वादशी यदि परत्र किञ्चिदुपैति व्याप्ता भवति द ५८, ए. ६०/१ द्वा तदा तु सर्वैगृंहिभिर्यतिभिश्च पूर्वां अरुणोदयवेधयुतां एकादशीं विहाय निश्चयं घटिकात्मिकापि परा कार्या ।

अविद्धापि च विद्धा स्यात् परतो द्वादशी यदि ।

इति वचनात् परदिने गृहिणां पारणाविधौ द्वादशी सद्भावात् पूर्वत्र यतीनां अरुणोदयविद्धा निषेधात् ॥९५॥

नन्दारुणोदयहताथ तथैव भद्रां
नन्दैव वत्स गृहिभिर्यतिभिः परैव
शून्यत्रयं यदि तिथित्रितयेपि तासां
मध्यैव वत्स गृहिभिर्यतिभिश्च कार्या ॥९६॥

नन्देति । वत्स हे पुत्र नन्दैकादशी अरुणोदयहता अथानन्तरं भद्रा तथैव तद्वेधयुक्तैव तदा गृहिभिः नन्दा एकादश्यैव कार्या । द. ५८, ए ५९, द्वा ५९, अत्रापि गृहिणामरुणोदयवेधनिषेधाभावात् यतिभिः परैव द्वादश्येव तन्निषेधात् वत्स हे

पुत्र यदि तिथित्रितयेपि दशम्येकादशीद्वादशीष्वपि शून्यत्रयं भवति । द. ए. द्वा. तदा यतिभिर्गृहिभिश्च तासां तिथिनां मध्या एकादश्येव कार्या । गृहिणां परदिने द्वादशी सद्भावात् यतीनां पूर्वत्र वेधयुतत्वाभावात् ।।९६।।

एवंविधोस्ति यदि निर्णय एष उक्तो
ग्रन्थे तथापि महतां श्रृणु सम्प्रदायम् ।
भद्राभिधामुपवसन्ति तिथेरसत्वे
द्वित्वेपरामितरथा सुत विद्यमानाम् ।।९७।।

निष्कर्षमाह–एवमिति यदि एष निर्णयः एकादशीव्रतनिर्णयः एवंविधो द्विविधो उक्तोस्ति । गृहिभिः पूर्वायतिभिः परेति तथापि महतां सम्प्रदायं श्रृणु तिथेरसत्वे एकादशीक्षये भद्राभिधां द्वादशीं तिथिमुपवसन्ति ।

लववेधेपि विप्रेन्द्र दशम्येकादशीं त्यजेत् ।
सुरायाविन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम् ।।
उदये यदि विद्धा तु दशम्यैकादशी तिथिः ।
दानवानां प्रीणानार्थं दत्तवान्पाकशासनः ।।
दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु ।।
एकादशी दिनक्षये उपवासं करोति यः ।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा ।।

इत्यादि वचनदर्शनात् । तस्या द्वित्वे एकादशीद्वित्वे परां लवाद्यात्मिकां उपवसन्ति ।

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।

सर्वैरेवोत्तरा कार्या इत्यादि स्कान्दात् । सुत हे पुत्र इतरथा अन्यप्रकारेण सन्देहाभावात् विद्यमानां दृश्यमानां एकादशांकयुतां उपवसन्ति ।

पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ।।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ।
नैकादशीं त्यजेद्यस्तु उपोष्यैकादशी तदा ।

इत्यादिवचनदर्शनात् ।।९७।।

एकादशीमुपवसेदसितां सितां च
यो नित्यमेष उदितः सुत विष्णुभक्तः ।
यस्य व्रतं भवति यत्र स तस्य भक्ताः
भक्तः पुमान्मत इति प्रकटप्रयोगात् ।।९८।।

एकादशीमिति । सुत हे पुत्र य असितां सितां च एकादशीं नित्यं उपवसेत् यत्तदोर्नित्यसम्बन्धात्स एव विष्णुभक्त उदितः प्रोक्तः ।

परमापदमापन्नो हर्षे वासमुपस्थिते ।
नैकादशीं त्यजेद्यस्तु स वै वैष्णव उच्यते ।।
यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।
तुल्येते मन्यते यस्तु स वै वैष्णव उच्यते ।।

इत्यादि वचनदर्शनात् । एतेन गृहिणां त्रयोदश्यां पारणे दोषशंका निरस्ता कुत इत्यत आह यत्र यस्यां तिथौ यस्य यस्य व्रतं भवति तस्य भक्ता तद्व्रतकर्ता स पुमान् भक्तो मतः सर्वमत आगत इति प्रकटप्रयोगात् यथा जन्माष्टम्यां कृष्णपूजनकाले कृष्णभक्तः हरितालिकायां शिवार्चने शिवभक्ता वरदचतुर्थ्यां गणेशपूजनकाले गणेशभक्तः शिवरात्रौ शिवपूजनकाले शिवभक्तः इति सिद्धान्तात् एकादश्यामुपवासकाले वैष्णव एवेति भावः।।९८।।

एकादशीव्रतमदः परमष्टमाब्दा-
दर्वागशीतितमवत्सरतो विदध्यात् ।
भक्तः शिवाच्युत शिवार्कगणाधिपानाम्
नारी च नित्यमुपलभ्य हि भर्तुराज्ञाम् ।।९९।।

एकादशीव्रतमिति । अद एतत् एकादशीव्रतं अष्टमाब्दात् अष्टमाद्वर्षात्परम् अशीतितमवत्सरतः अशीतम– वर्षात् अर्वाग् विदध्यात् कुर्यात् ।

अष्टवर्षाधिको मर्त्यो ह्यशीति न्यूनवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥

इति माधवोक्तेः । क इत्यपेक्षायामाह शिवादीनां भक्तः

वैष्णवो वाथ शैवो वा कुर्यादिकाशीव्रतं ।
वैष्णवो वाथ शैवो वा सौरोप्येतत्समाचरेत् ॥

इत्यादिवचनदर्शनात् । नारी च भर्तुः सकाशादाज्ञामुपलभ्य प्राप्य कुर्यात् ।

तत् पत्यौ जीवति यानि उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्तु नरकं चैव गच्छति ॥

भर्तुराज्ञां विना दोषश्रवणात् ॥९९॥

इत्थं विचार्य तनयोपवस त्वमस्याम्
दत्ते रमस्व कुरु नक्तमथैकभक्तम् ।
कर्तव्यमिष्टदमुपोषणमात्मशक्त्या
नैकादशी मतिमता तु वृथैव नेया ॥१००॥

इत्थमिति । तनय हे तात इत्थममुना प्रकारेण विचार्य निर्णीय अस्यामेकादश्यां त्वमुपवस ।

नैकादशी व्रतं यस्तु कुरुते स तु नारकी ॥

इति वचनात् । अथवा दत्ते मात्रादि दत्ते रमस्व मात्रादि दत्तेन संतुष्य अयाचितव्रतं कुर्वित्यर्थः अथवा नक्तं नक्तव्रतं कुरु अथवा एकभक्तं कुरु ।

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन न निर्द्वादशिको भवेत् ।।

इति वचनात् आत्मशक्त्या इष्टदं अभीष्टप्रदमुपोषणं कर्तव्यम् । एकादशी मतिमता बुद्धिमता तु वृथैव न नेया एतेषामुपवासादीनामन्यतमेनोपेष्येत्यर्थः पूर्वोक्तवचनात् ।।१००।।

नाद्यान्मसूरचणकान्मधुमांसशाकान्,
कांस्ये परान्न बहुजीवनकोरदूषान् ।
द्यूतं प्रियामपि न जातु भजेद्दशम्यां
कुर्वीत भक्तिसहितो जन एकभक्तम् ।।१०१।।

काम्यव्रतविधिमाह नेति । दशम्यां मसूरादीन् मध्वादीन् कांस्ये कांस्यस्थाल्यां परान्नबहुजीवनकोरदूषान् नाद्यात् नाश्नीयात् । बहुजीवनं बहुजलं मुहुर्मुहुः जलपानमित्यर्थः द्यूतं प्रियां भार्यामपि जातु कदाचित् नभजेत ।

दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् ।
गन्धताम्बूलपुष्पादि स्त्रीसम्भोगं महायशाः ।।
कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधुपरान्नं च त्यजेदुपवसंस्त्र्यहम् ।।

इति वचनात् । किं कुर्यादित्यत आह–भक्तिसहितो जन एक भक्तं कुर्वीत पुनर्भोजनमैथुने द्यूततमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् इति वचनात् ।।१०१।।

सर्वं त्यजेदुपवसन्विजितेन्द्रियः सन्
नन्नादि केशवतिथौ सकृदम्बुकष्टे ।
मर्त्यः पिबेन्निशि रमारमणस्य पूजां
गीतेन जागरणमादरतो विदध्यात् ।।१०२।।

सर्वमिति । मर्त्यो जनः केशवतिथौ एकादश्यां उपवसन् सर्वमन्नादि त्यजेत् न खादेत् । दशम्यादि महीपालेत्यादि वचनात् । अन्नाश्रितानि पापानीत्यादि वचनाच्च अन्नप्रभृति सर्वे भक्षादि चतुर्विधं न खादेदित्यर्थः पूर्वोक्तवचने ।

असकृज्जलपानाच्च सकृत्ताम्बूलभक्षणात् ।
उपवासः प्रणश्येत दिवास्वप्नाच्च मैथुनात् ।।

इति वचनाच्च चतुर्विधद्रव्यस्य वर्जने पानीयमपि वर्जितमालोक्याह कष्टे सङ्कटे अम्बु जलं सकृत्पिबेत् तस्मादेव वचनात् ।

अत्यये चाम्बुपानेन नोपवासः प्रणश्यति ।

इति वचनाच्च कष्टे जलपानस्य दोषाभावश्रणात् सर्वं त्यजेदिति उक्तम्–

गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतम् ।।

इति वचनदर्शनात् ।

स्तेनहिंसकयोः सख्यं कृत्वा स्तन्यं च हिंसकम् ।
प्रायश्चित्तं व्रती कुर्यात् जपेत् नाम शतत्रयम् ।।

इति प्रायश्चित्तदर्शनात् ।

अत एव विजितेन्द्रियः सन् भूत्वेत्यर्थः । अत एव कारणात् अश्राव्यश्रवणमवाच्य जल्पनं दर्शनानर्हा लोकनं भोजनं च वर्जितम् । ततः किमित्यत आह रमारमणस्य लक्ष्मीपतेः पूजां विदध्यात् यामे यामे हरेः पूजामित्यादि वचनात् । पुनः किमित्यत आह आदरत आदृतः सन् गीतेन हरिनामगीतेन निशि जागरणं विदध्यात् रात्रौ जागरणं कुर्यात् इति वचनात् ।।१०२।।

एवं विधाय निशि जागरणं मनुष्यः
किं वा निरास्तरणभूमितले शयित्वा ।

प्रातर्विबुध्य कृतनित्यविधिः परस्यां
कुर्वीत वत्स दशमी दिनवच्च सर्वम् ॥१०३॥

एवमिति । वत्स हे पुत्र मनुष्यो जन एवं निशि रात्रौ जागरणं विधाय किं वा निरास्तरणभूमितले शयित्वा कम्वलादि-रहितभूतले शयित्वा ।

अक्षारलवणः सर्वैं हविष्यान्ननिषेवना ।
अवनीतल्पशयना प्रियासङ्गम वर्जिताः ।

इति वचनात् च पुनः प्रातः काले विबुध्य बुधाकृतनित्यः विधिः विहितनित्यक्रियः परस्यां द्वादश्यां सर्वं दशमीदिनवत् कुर्वन्ति । दशम्यां यद्वर्जितं तत्तद्वर्जयेत्, यद्यत्कृतं तत्तद् कुर्या-दित्यर्थः ।

दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् ।
इत्यादि वचनात् । ॥१०३॥

पूर्वाथवा सुत पराधिककालयुक्ता
मध्याह्नगैव फलदा तिथिरेकभक्तेः ।
तत्रापि मुख्य उदितो नवमो मुहूर्त्तो
ग्रन्थे पुराणमुनिभिर्हृदभीष्टसिद्धयै ॥१०४॥

एकभक्तमाह पूर्वेति । सुत हे पुत्र पूर्वा अथवा परा अधि-ककालयुक्ता तिथिर्मध्याह्नगैव एकभक्ते फलदा पूर्वा वा परा वा या अधिककालव्यापिनी सैव फलदायिनीत्यर्थः

मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः ।

इति वचनात् तत्रापि मध्याह्नेपि ग्रन्थे पुराणमुनिभिः हृदभीष्टसिध्यै मनोभीष्टसिद्धये नवमो मुहूर्त्तं मुख्य उदितः सप्तदशाष्टादशदण्डौ मुख्यः काल प्रोक्त इत्यर्थः

दिनार्द्धसमयेऽतीते युज्यते नियमेन तत् ।
एकभक्तमितिप्रोक्तः मतस्तस्यादि वै वहीं ।।

इति स्कान्दोक्ते । मध्याह्नान्तदले त्रिभागदिवसे स्यादेकभक्तमिति दीपिकोक्तेश्च ।।१०४।।

अस्तं गते दिनकरे घटिका षडाद्या
व्याप्नोति या सुत परा किमथापि पूर्वा ।
साभीष्टदा भवति नक्तविधौ जनानां
तत्रापि चाद्यघटिका त्रितयं निषिद्धम् ।।१०५।।

नक्तव्रतमाह अस्तंगतेति । सुत हे पुत्र दिनकरे सूर्ये अस्तं गते सति आद्या षट्घटिका या अपरा किमथवा पूर्वा तिथिर्व्याप्नोति सा नक्तविधौ नक्तव्रते अभीष्टदा भवति

प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः ।

वत्सोक्तेः

त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तंगते सदा ।
नक्तं तु तत्र कर्तव्यं इति शास्त्रविनिश्चयः ।।

इति व्यासोक्तेश्च । तत्रापि आद्यघटिका त्रितयं आद्यास्त्रयोदण्डा निषिद्धं भोजनानर्हा भवन्ति

सायं सन्ध्या त्रिघटिका अस्तादुपरि भास्वतः

इति स्कान्दोक्तेः

दण्डत्रयस्य संध्यात्वात्तत्र चत्वारि नामनि
कर्माणि संध्यायां परिवर्जयेत् ।
आहारं मैथुनं निन्द्रां स्वाध्यायां च चतुर्थकम्

इति मार्कण्डेयेन भोजननिषेधात् ।।१०५।।

नोचेत्प्रदोषसमये द्विवसद्वयेपि
पुण्या तिथिः सुत दिवाद्य घटीद्वयेन्त्ये ।

भक्तोच्युतस्य तु तिथावुदये स्थितानां
सौरःषडन्त्यघटिकाः सुदिनस्य कुर्यात् ।।१०६।।

नो इति । सुत हे पुत्र पुण्या तिथि दिवसद्वयेपि प्रदोषसमये चेत् यदि नो न स्यात् तदा दिवा दिनेपि अन्त्ये वटीद्वये कुर्यादित्यर्थः ।

अतथात्वे परत्र स्यादस्तादर्वाग्यतो हि सा ।।

इति वचनात्

प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
आत्मनो द्विगुणा छाया मन्दीभवति भास्करे ।।
तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनम् ।

इति स्कान्दाच्च अच्युतस्य भक्तस्तु उदये स्थितायां तिथौ कुर्यात्

उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः ।

इति वचनात् । सौरः सूर्यभक्तस्तु षडन्त्यघटिकासु स्थितायां तिथौ कुर्यात्

तिमुहूर्त्तं स्पृगेवाह्नि निशि चैतावती तिथिः ।

इति वचनात् ।।१०६।।

स्याच्चेत्प्रदोषसमये दिवसद्वयेपि
कार्या पराथ सुत नक्तविधौ विधेयम्
स्नानं हविष्यमदनीयमथाग्निकार्य
माहारलाघवमसत्यविवर्जनं च ।।१०७।।

स्यादिति । सुत हे पुत्र या सा तिथि द्विवसद्वयेपि प्रदोषसमये स्यात् भवेत् तदा परा कार्या ।

उभयोर्यदि वा तिथ्योः प्रदोषव्यापिनी तिथिः ।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत ।।

इति जावालिवचनात् । तत्र किं कार्यमित्यत आह अथानन्तरं नक्तविधौ स्नानं विधेयं हविष्यं अदनीयं भोज्यं अथानन्तरं अग्निकार्यं व्याहृतिहोमः आहारलाघवम् अल्पभोजनं च पुनः असत्यविवर्जनं विधेयमित्यन्वयः ।

हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ।
अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत् ।।

इति गारुडोक्तेः ।।१०७।।

ज्येष्ठे सितां तिथिमुपोष्य विनाम्बुपान-
मेकादशीं द्विजवराय हिमोदकुम्भम्
दत्वा सितान्वितमुदारमतिर्मनुष्यो
लक्ष्मीपतेर्निकटमेति न संशयोत्र ।।१०८।।

ज्येष्ठ इति । मनुष्य ज्येष्ठे मासि सितां शुक्लां एकादशीतिथिमम्बुपानं जलपानं विना जलपानमपि त्यक्त्वा उपोष्य द्विजवराय सितान्वितं सशर्करं हिमोदकुम्भं शीतजलपूर्णं घटं उदारमतिः दृढमतिः सन् दत्वा लक्ष्मीपतेर्विष्णोर्निकटं सामीप्यं एति प्राप्नोति । अत्र संशयो न मन्तव्य इति शेषः ।

ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी स्मृताः ।
निर्जलं समुपोष्यात्र जलकुम्भान् सशर्करान् ।।
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ ।

इति स्कान्दोक्तेः ।।१०८

शेते भुजङ्गशयने भगवान्हि यत्र
सैकादशी शुचिसिता शयनीति विष्णोः

ख्याताथ तत्र कलुषक्षपणाय चातु-
र्मास्य व्रतं किमपि शोभनमारभस्व ॥१०९॥

शेत इति । यत्र यस्यां हि निश्चयं भगवान् विष्णुर्भुजङ्ग-शयने शेते स्वपिति सा शुचिरिता आषाढ शुक्लपक्षस्था एकादशी विष्णोर्शयिनी हरिशयनीति ख्याता

एकादश्यां तु शुक्लायामाषाढे भगवान् हरिः ।
भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥

इति ब्राह्मयोक्तेः ।

आषाढ शुक्लैकादश्यां कुर्यात् स्वप्नमहोत्सवम् ।

इति स्कान्दोक्तेश्च । अथानन्तरं तत्रैकादश्यां कलुषक्षपणाय पापसंहाराय किमपि शोभनं चातुर्मास्यव्रतं आरभस्व

आषाढे तु सिते पक्षे एकादश्यामुपोषितः ।
चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः ॥

इति भारतोक्तेः ।

वार्षिकांश्चतुरो मासान् वाहयेत्केनचिन्नरः ।
व्रतेन नोचेदाप्नोति किल्विषं वत्सरोद्भवम् ॥

इति तत्रैवोक्तेः ॥१०९॥

विष्णुं समर्च्य विधिना प्रयतः प्रभाते
विज्ञाप्य वत्स विहितांजलिकस्तदानीम्
संकल्पयेद् व्रतमिदं पुरतः करिष्ये
त्वत्प्रीतयेऽहमिति शुद्धमतिर्मनुष्य ः॥११०॥

विष्णुमिति । वत्स हे पुत्र प्रभाते प्रयतः शुद्धमतिश्च विधिना विष्णुं समर्च्य पूजयित्वा तदानीं विहिताञ्जलिकः कृताञ्जलिपुटः इदं व्रतं त्वत्प्रीतये करिष्ये इति पुरतोग्रे विज्ञाय

सङ्कल्पयेत्

महापूजां ततः कुर्याद्दैव देवस्य चक्रिणः ।
जाती कुसुममालाभिर्मंत्रेणानेन पूजयेत् ।।
सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ।
विबुद्धे तु विवुद्धेत प्रसन्नो मे भवाच्युतः ।।
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं पुनः ।
प्रभाते वाग्रते विष्णोः कृताञ्जलिपुटस्तथा ।।
वार्षिकां श्चतुरोमासान्देवस्थो स्थापनांविधिः ।
इमं करिष्ये नियमं निर्विघ्नं कुरुमेऽच्युत ।।
इदं व्रतं मया देव गृहीतं पुरतस्तव ।
निर्विघ्नसिद्धिमायातु प्रसादात्तव केशव ।।
गृहीतेस्मिन् व्रते देव यद्यपूर्णे म्रियेे ह्ययम् ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दनः ।।

इति विधिदर्शनात् ।

प्रतिवर्षं तु यः कुर्याद्दैवं वै संस्मरन् हृदि ।
देहान्ते विप्र दीप्तेन विमानेनार्कवर्चसा ।।
मोदते विष्णुलोकेसौ यावदाहू भूत संप्लवम् ।।

इति वचनात् ।।११०।।

शाकं त्यजेन्नभसि वै दधि मासि भाद्रे
क्षीरं तथाश्वयुजि कार्तिकिके द्विपत्रम्
मंचादि मांसमधुमूलकराजमाष
वृन्ताकसर्षपपटोलमसूरसंगान् ।।१११।।

शाकमिति । नभसि श्रावणमासे शाकं त्यजेत् नखादे दित्यर्थः । शाकस्तु

मूलपत्रकरीराग्रफलकाण्डादि रूढकाः ।

त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम् ।।

श्रावणे वर्जयेत् शाकमिति वचनात् । वै निश्चयं भाद्रे भाद्रपदे मासि दधि त्यजेत् दधि भाद्रपदे तथेति वचनात् । तथा अश्वयुजि आश्विने मासि क्षीरं त्यजेत् दुग्धमश्वयुजे मासि इति वचनात् ।

कार्तिके कार्तिके मासि द्विपत्रं द्विदलं त्यजेत् ।

कार्तिके द्विदलं त्यजेदिति वचनात् । तथा

चत्वार्येतानि नित्यानि चतुराश्रमवर्तिनाम् ।
प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं नरैः ।।
द्वितीये मासि कर्तव्यं दधि व्रतमनुत्तमम् ।
पयोव्रतं तृतीयेपि चतुर्थेपि निशामयः ।।
द्विदलं वहुवीजं च वृन्ताकं च विवर्जयेत् ।
नित्यानेतानि विपेन्द्र वृतान्याहुर्मनीषिणः ।।

इति स्कान्दोक्तेश्च । द्विपत्रं पत्रद्वयेनोद्भूतजातिकं ततः किं त्यजेदित्यत आह मंचादि मांसादीन् त्यजेत् । संग स्त्रीसङ्गः ।

वार्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्दने ।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ।।
नृपतौ वर्जयेद्भार्यां मांसं मधु परौदनम् ।
पटोलं मूलकं चैव वृन्ताकं च विवर्जयेत् ।।
अभक्षं वर्जयेदूरान् मसूरान् सितसर्षपान् ।
राजमासान् कुलत्थांश्च आसुधान्याश्च सत्यजेत् ।।

इत्यादिवचनदर्शनात् ।।१११।।

एकादशी भवति वत्स सिता नभस्ये
तस्यामुपेन्द्रमधिसंध्यमहिस्थमर्चेत्
उत्थापनं च विदधीत वृषध्वजस्य
विश्वादिभ त्रितययोगसमन्वितायम् ।।११२

येति । वत्स हें पुत्र या नभस्ये भाद्रपदमासे सिता शुक्ल-पक्षस्था एकादशी भवति तस्यां अधिसन्ध्यं सन्ध्यायां अहिस्थं शेषनाग–भोगे शयानं उपेन्द्रं अर्चेत् पूजयेत् ।

सन्ध्यायां विष्णुमभ्यर्च्य प्रार्थयेत् विहिताञ्जलीः ।

इति वचनात् मन्त्रस्तुः–

वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ।।

इति च पुनः विश्वादिभ त्रितय यो समन्वितायां उत्तराषाढाश्रवणधनिष्ठान्यतमर्क्षयुतायामस्यामेव वृषध्वजस्य शक्र-ध्वजस्योत्थापनं विदधीत ।

द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवण वासवः ।।

इति गर्गेणोक्तेः । द्वादशीस्थाने एकादशी वोध्याः ।।११२।।

एकादशीं यदि सुत श्रवणर्क्षयुक्तां
द्वादश्यनुस्पृशति तां बुधबारयोगात् ।
सन्तः प्रियां भगवतो हरिश्रृङ्खलाख्यां
जल्पन्ति नूनमुपवासविधौ प्रशस्ताम् ।।११३।।

एकादशीमिति । सुत हे पुत्र श्रवणर्क्षयुक्तामेकादशीं द्वादशीं यदि अनुस्पृशति तदा नूनं निश्चयं बुधवारयोगात् सन्तो बुद्धिमन्तो जना हरिश्रृङ्खलाख्यां भगवतो विष्णोः प्रियां उपवास-विधौ अतिप्रशस्तां जल्पन्ति प्रवदन्ति–

एकादशी द्वादशी च वैष्णव्यमपि तत्र च ।
तद्विष्णुश्रृङ्खलं नाम विष्णु सायुज्यकृद्भवेत् ।।
संस्पृश्यैकादशीं राजन्द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ।।

बुधश्रवणसंयुक्ता सैव चेद् द्वादशी भवेत् ।
अत्यन्त महती सा स्यात् दत्तं भवति चाक्षयम् ।।
इत्यादि वचनदर्शनात् ।।११३।।

प्रान्ते निशोपि यदि सा भवति त्रियुक्ता
कार्या तथापि परतस्तु न तच्चतुष्कम्
चेद्वैष्णवं परत एव पराप्युपोष्या
कार्या न वत्स मनसि व्रतलोपशङ्का ।।११४।।

प्रान्त इति । निशः निशायाः प्रान्तेपि यदि सा त्रियुक्ता बुधश्रवणद्वादशीयुक्ता भवति तदा सा पूर्वा कार्या ।

तिथिनक्षत्रयोर्योगो योगश्चैव नराधिपः ।
द्विकलो यदि लभ्येत स ज्ञेयस्त्वष्टयामिक ।।

इति नारदीयोक्तेः । तथापि परतस्तु नतच्चतुष्कं नते चत्वार एकादशीद्वादशीबुधवैष्णवाख्या योगाः वैष्णवं श्रवणं परत एव चेत् तु परापि द्वादश्यप्युपोष्या एकादशीमुपोष्य द्वादश्यप्युपोष्येत्यर्थः । वत्स हे पुत्र मनसि व्रतलोपशङ्का न कार्या ।

एकादश्यामुपोष्यैव द्वादशी समुपोष्येत् ।
न चात्र विधिलोपः स्यादुभयोर्हरिदैवतम् ।।

इति भविष्योक्तेः । पूर्वत्र श्रवणं चेत्पूर्वा परत एव चेत्परा बुधस्तु सतिसम्भवे इति ज्ञेयम् ।।११४।।

ऊर्जे सिता तु सुत सा हरिबोधनीति
यस्यां प्रबोधमधिगच्छति शेषशायी ।
यद्भीष्मपंचकमिति प्रथितं जगत्याम्
आरम्भमिष्टदमुशन्ति हि तस्य सन्तः ।।११५।।

ऊर्ज इति । सुत हे पुत्र ऊर्जे कार्तिकमासे सिता

एकादशी हरिबोधिनीति अभिहिता। यस्यां शेषशायी विष्णुः प्रबोधमधिगच्छति प्रबुध्यति।

एकादश्यां च शुक्लायां कार्तिके मासि केशवम्।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥

इति ब्राह्मोक्तेः।

जगत्यां यद्भीष्मपंचकमिति प्रथितं तस्य सन्त इष्टदमभीष्टप्रदमारम्भमस्यामेकादश्यामुशन्ति च

अतो नरैः प्रयत्नेन कर्तव्यं भीष्मपञ्चकम्।
कार्तिकस्यामले पक्षे स्नात्वा सम्यग्यत व्रतः।
एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम्॥

इति नारदीयोक्तेः। तद्विधिस्तु निर्णयसिन्धौ ज्ञेयः॥११५॥

एकादशीत्थमसितापि सितापि सर्वा
स्वल्पापि नित्यमुपवासविधौ परैव।
निष्पावका ननु भवात्मज नैव तस्यां
नस्यां कदापि नरकीत्यभिलाषयुक्ता ॥११६॥

एकादशीति। आत्मज हे पुत्र इत्थं अमुना प्रकारेण असितापि सितापि कृष्णा शुक्लापि सर्वा एकादशी नित्यं उपवासविधौ स्वल्पापि परैव दशमी विद्धा निषेधात् कदापि नर नरकभाक् न नस्यामित्यभिलाषयुक्तः सन् तस्यां सर्वस्यामेकादश्यान्निष्पावकान्नैवानुभवः

कूष्माण्डं बृहती फलानि लवणं वर्ज्यं तिलाम्लं तथा।
तैलं चामलकं दिवं प्रवसता शीर्षं कपालान्त्रकम्॥

निष्पावांश्चेति संग्रहश्लोकोक्तेः॥११६॥

आषाढ भाद्रपद कार्तिकशुक्लयाता
मैत्राच्युतान्त्यभयुता बिधुजस्य वारे।

सा द्वादशी यदि भवेदुपवासयोग्या
लोकेषु दुर्लभतरा हरिवासराख्या ।।११७।।

अथ द्वादशी निर्णीयते आषाढेति । आषाढभाद्रपदकार्तिकशुक्लयाता आषाढी भाद्रपदी कार्तिकीति तिस्रः शुक्ला द्वादश्यः मैत्राच्युतान्त्यभयुता, अनुराधायाषाढी श्रवणेन भाद्री रेवत्या कार्तिकीति क्रमः यदि विधुज्ञस्य वारे बुधवारे भवति तदा सा लोकेषु दुर्लभतरा अतिदुर्लभा हरिवासराख्या उपवासयोग्या भवति उपवासेऽधिकफलदा भवन्तीत्यर्थः ।

आभाका सितपक्षेषु मैत्रश्रवणरेवती ।
द्वादशी बुधवारेण हरिवासर उच्यते ।।

इति वचनात् ।।११७।।

मैत्राच्युतान्त्यभयुतासु न पारणोक्ता
भद्रासु वत्स निखिलव्रतनाशकत्वात् ।
कर्त्तव्यमेव यदि भत्रितयस्य पुंसाम्
तर्ह्यादिमध्यचरमाङ्घ्रिविवर्जितासु ।।११८।।

मैत्रेति । वत्स हे पुत्र मैत्राच्युतान्त्यभयुतासु अनुराधाश्रवणरेवतीयुतासु भद्रासु निखिलव्रतनाशकत्वात् पारणा नोक्ता न कथिता ।

आभाका सितपक्षेषु मैत्रश्रवणरेवती ।
सङ्गमेन हि भोक्तव्यं द्वादशद्वादशीक्षयात् ।।

इति वचनात् । यदि पुंसा मनुष्येण कर्तव्यं तर्हि भत्रितयस्य नक्षत्रयस्य आदिमध्यचरमाङ्घ्रिविवर्जितासु भद्रासु कर्तव्यमिति ।

मैत्राद्यपादे स्वपितीह विष्णुः
पौष्ण्यान्तपादे प्रतिबोधमेति ।

श्रुतेश्च मध्ये परिवर्तमेति

सुप्तौ प्रबोधे परिवर्तने च ।।

वर्ज्यमिति वचनात् ।।११८।।

आद्यामुपोष्य तिथिमङ्ग हरेः परस्यां

कुर्वीत पारणमनुज्झितनित्यकर्मा ।

श्रद्धान्वितोवनिसुरानपि भोजयित्वा

सन्तोषयेत् सुत समर्चनदक्षिणाभिः ।।११९।।

सर्वासां पारणामाह आद्यामिति । अङ्ग हे सुत हे पुत्र हरेर्विष्णोराद्यां तिथिमेकादशीं उपोष्य परस्यां द्वादश्यां अनुज्झितनित्यकर्मा विहितनित्यविधिः सन् पारणां कुर्वीत ।

द्वादश्यां पारितो विष्णुः सर्वाभीष्टफलप्रदः ।

इति वचनात् । किं कृत्वेत्यत आह श्रद्धान्वितः अवनिसुरान् ब्राह्मणान् भोजयित्वा ततः किमित्यत आह समर्चनदक्षिणाभिः पूजनदक्षिणाभिस्तान् सन्तोषयेत् ।।११९।।

भद्रातिथौ प्रथममासि मधौ सितायां

कुर्वीत वत्स दमनोत्सवमच्युतस्य ।

तत्तत्तिथौ किमथवापि मरुत्सखादेः

कुर्वीत यो न स नरो नरकं प्रयायात् ।।१२०।।

भद्रेति । वत्स हे पुत्र प्रथममासे आद्ये मासि मधौ चैत्रे सितायां शुक्लायां भद्रातिथौ द्वादश्यां अच्युतस्य दमनोत्सवं कुर्वीत

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।

इति वचनात् किमथवा मरुत्सखादेरग्न्यादीनां तत्तिथौ प्रतिपदादिषु यो नरो न कुर्वीत स नरो नरकं प्रयायात् ।

तद्दैवत्यतिथावेव वह्न्यादेर्दमनार्पणम् ।

इति वचनात् ।

उर्जे व्रतं मधौ दोला श्रावणे तुन्तपूजनं ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ।।

इति वचनात् । यस्य यस्य या या तिथिः तस्य तस्य तस्यां तस्यां तिथौ कुर्यादित्यर्थः । यथा अग्नेः प्रतिपद्विधेर्द्वितीया देव्यास्तृतीयेत्यादि । यथा रत्नमालायां —

वह्निर्विरिञ्चीर्गिरिजा गणेशः
फणी विशाखः सविता महेशः ।
दुर्गान्तिको विष्णुहरिस्मरश्च
शर्वः शशी चेति पुराणदृष्टः ।।१२०।।

वैशाखमाससितपक्षगता तु भद्रा
हस्तान्विता यदि भवेद् व्यतिपातयुक्ता ।
मेषे रविर्यदि हरौ क्षितिजामरेज्यौ
तस्यां गवादि वितरंस्तु लभेत सिद्धिम् ।।१२१।।

वैशाखेति । वैशाखमाससितपक्षगता वैशाखशुक्लपक्षस्था भद्रा द्वादशी यदि हस्तान्विता हस्तनक्षत्रयुता व्यतिपातयुक्ता भवेत् मेषे रवि यदि हरौ सिंहे क्षितिजामरेज्यौ कुजजीवौ तदा तस्यां गवादि वितरन् गोदानादि कुर्वन् सिद्धिं लभेत ।

पञ्चाननस्थो गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे ।
पाशाभिधाना करभेन युक्ता
तिथिर्व्यतीपात इतीह योगः ।।
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ।।

इति वचनात् ।।१२१।।

या द्वादशी तनय कार्तिकशुक्लयाता
तस्यां व्रतानि विहितानि नयेत्समाप्तिम् ।
दद्याद् गवादि विधिवद् द्विजपुङ्गवेभ्यः
कुर्वीत पारणमुपेन्द्रपदेऽर्पितस्य ।।१२२।।

येति । तनय हे पुत्र या कार्तिकशुक्लयाता द्वादशी तस्यां विहितानि शयनीत आरब्धानि व्रतानि समाप्ति साङ्गतां नयेत् ।

चतुर्धा गृह्यते चीर्णं चातुर्मास्यव्रतं नरः ।
कार्तिके शुक्लपक्षे तु द्वादस्यां तत्समापयेत् ।।

इति वचनात् ।

चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता ।।

इति वचनाच्च । मन्त्रस्तु–

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्दन ।।

इति द्विजपुङ्गवेभ्यः विधिवद् गवादि दद्यात् । मुकुन्द-पदेऽर्पितस्य हरिबोधिनीपर्यन्तं इदं व्रतं त्वत्पदेऽर्पयामि अर्पितस्य पारणं कुर्वीत ।

चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतं ।
कथयित्वा द्विजेभ्यस्तद् दद्यात् भक्त्या सदक्षिणम् ।।

इति वचनात् रेवतीप्रान्तपादे पारणानिषेधस्तु प्रागुक्तः।।१२२।।

सा द्वादशी तपसि शुक्लगता तु भीमा
पूर्वान्विता भवति पुण्यवती वृतादौ ।
सर्वापि वत्स हि तथैव सितासितापि
प्रोक्ता महद्भिरिति निन्दति वै मसूरान् ।।१२३।।

सेति । तपसि माघे शुक्लगताब्दा द्वादशी भीमा
त्वया कृतमिदं वीर तव नाम्ना भविष्यति ।
सा भीमा द्वादशी ह्येषा सर्वपापहरा शुभा ।।

इति वचनात् सा व्रतादौ पूर्वान्विता सैकादशी द्वादशी पुण्यवती भवति, रुद्रेण द्वादशीति युग्मवाक्यात् । वत्स हि निश्चयं सर्वापि सा सितासितापि तथैव पूर्वान्वितैव तस्मादेव वचनात् सा तिथिः वै निश्चयं मसूरान् निन्दति इति महद्भिः प्रोक्ता निष्पावांश्च मसूरकान्नितिसंग्रहोक्तेः ।।१२३।।

पूर्वा सितां कुरु तिथिं सुत मन्मथस्य
तत्स्वामिनोऽर्चनविधौ सति मासि चैत्रे ।
कृष्णा तु मन्दवरुणर्क्षयुता द्युनद्यां
स्नाने फलं वितरति ग्रहकोटितुल्यम् ।।१२४।।

अथ त्रयोदशी निर्णीयते । पूर्वामिति सुत हे पुत्र चैत्रमासि मन्मथस्य कामस्य तिथिं त्रयोदशीं तत्स्वामिनः कामस्यार्चनविधौ पूर्वां पूर्वान्वितां कुरु । त्रयोदशतिथिः पूर्वा सिताथासिता पश्चा-दिति दीपिकोक्तेः । मन्दवरुणर्क्षयुता शनिवारशतभिषङ्नक्षत्रयुता कृष्णा चैत्रे कृष्णपक्षा तु द्युनद्यां स्नानं ग्रहकोटितुल्यं फलं वितरति ।

वारुणेन समायुक्ता मधौ कृष्णा चतुर्दशी ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ।।

इति स्कान्दात् ।

मधौ कृष्णत्रयोदश्यां शनौ शतभिषा यदि ।
वारुणीति समाख्याता शुभे तु महती स्मृता ।।

इति ब्राह्माच्च ।।१२४।।

पूर्वा सिता सुत परा त्वसिता विधेया
सर्वा तिथिर्मनसिजस्य पुराणदृष्टा ।
वृन्ताकमासु मुनयः परिवर्जयन्ति
सन्तो महद्भिरुदितं परिपालयन्ति ।।१२५।।

पूर्वेति । सुत हे पुत्र सिता शुक्लपक्षस्था पूर्वा पूर्वान्विता असिता कृष्णपक्षस्था परा परान्विता विधेया पुराणदृष्टा पुराणषु दृष्टा भवति ।

शुक्लत्रयोदशी पूर्वा परा कृष्णा त्रयोदशी ।

इति माधवोक्तेः । आसु सितासितासु त्रयोदशीषु मुनयः वृन्ताकं परित्यजन्ति । सन्तो महद्भिरुदितं प्रोक्तं परिपालयन्ति । निष्पावांश्च मसूरकानथ फलं वृन्ताकसंज्ञेति संग्रहश्लोकोक्तेः ।।१२५।।

पूर्वान्वितैव मधुशुक्लचतुर्दशी तु
शम्भोः प्रपूजविधौ निशि विद्यमाना ।
एवं नभस्यपि सिता सुत माधवे तु
व्याप्ता प्रदोषसमयं नृहरेर्जयन्ती ।।१२६।।

अथ चतुर्दशी निर्णीयते पूर्वान्वितेति । सुत हे पुत्र मधुशुक्लचतुर्दशी चैत्रशुक्लपक्षस्था चतुर्दशी तु शम्भोः शिवस्य प्रपूजनविधौ निशि विद्यमाना रात्रिव्यापिनी सती पूर्वान्वितैव कार्येति शेषः ।

मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन ।।

इति बौधायनोक्तेः, चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो इति वचनाच्च । एवं नभसि श्रावणे सिता शुक्लापि मधो श्रावणमासस्येति पूर्वोक्तवचपात् । माधवे वैशाखे शुक्ला तु प्रदोषसमयं व्याप्ता नृहरेर्जयन्ती नृसिंहजयन्तीति ख्याता भवति ।

वैशाखशुक्लपक्षे तु चतुर्दश्यां निशामुखे ।
मज्जन्मसदृशं पुण्यं व्रतं पापप्रणाशनम् ।।

इति नृसिंहपुराणात् । दिनद्वये सती असती वा परेति स्फुटार्थः ।।१२६।।

स्वातीयुता यदि शनौ सति सिद्धयोगे
शस्ता वणिक्करणयुङ् नृहरेर्जयन्ती ।
वर्णैश्चतुर्भिरिह कार्यमिदं व्रतं तु
भक्तैर्नृसिंहविबुधस्य तु वै विशेषात् ।।१२७।।

योगविशेषमाह स्वातीति । इयं नृहरेर्जयन्ती यदि सिद्धियोगे शनौ वारे वणिजिकरणे स्वातीयुता शस्ता प्रशस्ता स्वातीनक्षत्र–योगे च शनिवारे च मद्व्रतं सिद्धियोगस्य संयोगे वणिजकरणे तथा

पुंसां सौभाग्ययोगेन लभ्यते देवयोगतः ।।

इति वचनात् इह इदं व्रतं चतुर्भिर्वर्णैः कार्यम् ।

सर्वेषामेव वर्णानामधिकारोस्ति मद्व्रते ।

इति वचनात् सिंहविबुधस्य भक्तैस्तु वै निश्चयेन विशेषतः कार्यं, मद्भक्तैस्तु विशेषणेत्यादि वचनात् ।।१२७।।

भाद्रे सिता तु विहितौदयिकी फलाढ्या
नक्तव्रते यदि भवेद्दिवसद्वयेऽपि ।
पूर्वा तदा तु फलदेषसितेतरा तु
चन्द्रोदयावधि समेतवती विधेया ।।१२८।।

भाद्र इति । भाद्रपदमासे सिता शुक्ला चतुर्दशी तु अनन्तव्रते औदयिकी उदयकालव्यापिनी फलाढ्या फलदा विहिता

उदये त्रिमुहूर्त्तापि ग्राह्याऽनन्तव्रते तिथिः ।

इति वचनात् ।

तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्याः समायोगे व्रतं चानन्तकं रचेत् ।।

इति वचनात्

मुहूर्त्तमपि चेद्भाद्रे पूर्णमायां चतुर्दशी ।
सम्पूर्णां तां विदुस्तस्यां पूजयेद् विष्णुमव्ययम् ।।

इति वचनाच्च यदि द्विवसद्वयेपि तथा भवेत् औदयिकी स्यात् तदा फलदा तु पूर्वा कर्मकालव्याप्तेराधिक्यात्, इषसितेतरा आश्विनकृष्णा चतुर्दशी तु चन्द्रोदयावधि चन्द्रोदयपर्यन्तं समेतवती परेद्युः पूर्वेद्युर्वा चन्द्रोदयसतीत्यर्थः ।

अश्वयुक् कृष्णपक्षस्य चतुर्दश्यां विधूदये ।
तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा ।।

इति वचनात् ।।१२८।।

तस्यां विधूदयमुपेत्य निषेव्य तैलं
स्नायान्नरो नरकभीरु उमेशतिथ्याम् ।
स्नानं प्रशस्तमरुणोदयतः समन्त्रं
दीपावलीं च विदधीत ततः प्रदोषे ।।१२९।।

तस्यामिति । नरकभीरुः नरकाद् बिभ्यत् नरः तस्यामुमेशतिथ्यां चतुर्दश्यां विधूदयमुपेत्य चन्द्रोदयकालं प्राप्य तैलं तिलतैलं निषेव्य ते नाभ्यज्येत्यर्थः स्नायात् ।

स्नानं समेभ्यज्य नरैस्तु कार्यं
सुगन्धितैलेन विभूतिकामैः ।

इति वचनात् समन्त्रं स्नानं सीतालोष्ठेत्यादि मन्त्रपूर्वं अरुणोदयतः प्रशस्तं

अरुणोदयतोऽन्यत्ररिक्तायां स्माति यो नरः ।
तस्यादिकभवो धर्मो नश्यत्येव न संशयः ।।

इति वचनात् । सप्तम्यर्थे तसि ततस्तदनन्तरं प्रदोषे

प्रदोषकाले दीपावलीं विदधीत ।

ततः प्रदोषसमये दीपान् दद्यान् मनोरमान् ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥

इति वचनात्

अमावास्यां चतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धिकारेभ्यो मुच्यते कार्तिके नरः ।

इति वचनाच्च ॥१२९॥

तस्यां विधाय यमतर्पणमात्मजातो
भीष्मस्य तर्पणमपि प्रयतो विदध्यात् ।
भुञ्जीत माषदलशाकमनन्यचेताः
पश्यन्न जातु नरकं न हि संशयोऽत्र ॥१३०॥

तत्किमित्यत आह तस्यामिति । आत्मज हे पुत्र अतः अतःपरं तस्यां चतुर्दश्यां यमतर्पणं यमाय धर्मराजायेत्यादि मन्त्रैर्विधाय भीष्मस्य तर्पणमपि वैयाघ्रपदगोत्रायेत्यादि मन्त्रेण प्रयतः सन् विदध्यात् ।

जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।

इति वचनात् । पुनः किमित्यत आह भुञ्जीतेति । अनन्यचेताः दृढचित्तः सन् माषदलशाकं भुञ्जीत । जातु कदाचित् हि निश्चयं नरकं न पश्येत् अत्र संशयो न नास्तीत्यर्थः ।

माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः ।
प्रताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते ॥

इति वचनात् ॥१३०॥

कृष्णे सती तपसि मासि चतुर्दशी तु
व्याप्ता निशीथमुभयत्र तु सा सपूर्वा ।

नोचेद्द्वयोरपि तदा तु भवेत्परैव
मुख्यो निशीथसमयः शिवपूजनादौ ।।१३१।।

शिवरात्री निर्णीयते कृष्णे इति । तपसि माघे मासि कृष्णे कृष्णपक्षे सती चतुर्दशी तु निशीथसमयं व्याप्ता कार्या ।

अर्द्ध रात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रते तत्र सोश्वमेधफलं लभेत् ।।

इति वचनात्

माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ।।
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रत ।।

इति वचनात् सा उभयत्र तु दिनद्वये निशीथव्याप्ता तु सा सपूर्वा पूर्वान्विता

अर्द्ध रात्रपुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ।।

इति वचनात्

भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ।।

इति वचनाच्च । चेत् यदि द्वयोरपि दिनद्वयेपि निशीथव्याप्ता न तदा तु परैव

माघासिते भूतदिनं हि राजन्
उपैति योगं यदि पंचदश्यां ।
जयाप्रयुक्तां न तु जातु कुर्यात्
शिवस्य रात्रिप्रियकृच्छिवस्य ।।

इति वचनात् प्रदोष व्याप्तित्वादित्यर्थः शिवपूजनादौ निशीथसमयो मुख्यः । शिवस्य निशीथे एव उत्पत्तिकालः । परिशेषात् प्रदोषो गौणः । निशीथव्याप्त्यसत्वात् मुख्याभावे गौण इति सिद्धान्तात् ।।१३१।।

स्याच्चेत्प्रदोषसमये दिवसद्वयेपि
पूर्वैव नैव यदि वैकदिनेपि वा स्यात् ।
भौमेथवा शशिनि वार्कदिनेपि वा स्यात्
योगे शिवे सुत यदीयमतिप्रशस्ता ।।१३२।।

स्यादिति । चेत् यदि दिवसद्वयेपि प्रदोषसमये अस्तीति शेषः । तदा पूर्वैव

प्रदोषव्यापिनो ग्राह्या शिवरात्रिश्चतुर्दशी ।।

इति वचनात् । पूजाकाले तद्व्याप्तिसत्वात् यदि दिनद्वयेपि नैव प्रदाषव्यापिनी नैव तदापि पूर्वा परदिने प्रदोषे तदभावात् पूर्वदिने निशीथव्याप्तिसत्वात् अपि वा एकदिने तथाविधा स्यात् प्रदोषव्यापिनी स्यात् तदापि पूर्वा परदिने प्रदोषव्याप्ति-सत्वेपि पूर्वदिने उभयव्याप्तिसत्वाद्वा परदिने उभयका-लव्याप्तौ परा प्रदोषकालव्याप्तौ पूर्वा अनुभयव्याप्तौ पूर्वा पूर्वदिने उभयव्याप्तौ पूर्वा प्रदोषव्याप्तसत्वेपरा अनुभयव्याप्तौ परा निशीथव्याप्तौ पूर्वेति ज्ञातव्यं । योगविशेषमाह–सुत हे पुत्र यदि इयं भौमे भौमवारे अथवा शशिनि सोमवारे वा अर्कदिनेपि तेषामन्यतमेत्यर्थः शिवयोगे स्यात् तदाऽतिप्रशस्ता

वारेर्कसोमभौमानां स्याच्चेदन्यतमस्य तु ।
शिवयोगे तदा ज्ञेया शम्भोः प्रीतिकरी तिथिः ।।

इति वचनात् ।।१३२।।

नित्यापि सम्भवति वत्स मते मुनीनां
काम्यापि सा शिवनिशार्चयितुर्जनस्य ।
संपूज्य गन्धकुसुमाक्षतविल्वपत्रै–
र्भक्त्या शिवं निशि सुतोषसि पारणीयम् ।।१३३।।

नित्यापीति । वत्स हे पुत्र सा शिवनिशा शिवरात्रि अर्चयितु-र्जनस्य मुनीनां मते नित्यापि संभवति ।

परात्परतरं नास्ति शिवरात्रिपरात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ।।
जन्तु जन्मसहस्रेषु भ्रमते नात्र संशयः ।

इति वचनात् सा काम्यापि सम्भवति ।

मम भक्तस्तु यो देवी शिवरात्रिमुपोषकः ।
गणत्वमक्षयं दिव्यं अक्षयं शिवशासनम् ।।
सर्वान्भुक्त्वा महाभोगास्ततो मोक्षमवाप्नुयात् ।

इति स्कान्दात् ।

शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ।।

इति वचनाच्च । ततः किमित्यत आह– निशि रात्रौ शिव गन्धादिभिः सम्पूज्य उषसि प्रभाते पारणीयं पारणं कर्तव्यम् ।

शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत् ।

इति वचनात्

तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ।

इति तिथिमध्यपारणाविधानात् ।।१३३।।

कृष्णा खिलार्चनविधौ वृषवाहनस्य
तादृग् भवेदितरकर्मणि सा सपूर्वा ।
शुक्ला परा सुत कदापि न माक्षिकस्या–
स्वादो नृणां हितकरो हि चतुर्दशीषु ।।१३४।।

कृष्णेति । सुत हे पुत्र अखिला सर्वा चतुर्दशी वृषवाहनस्य शिवस्यार्चनविधौ तादृक् भवेत् उभया व्याप्ता परा प्रदोषकालव्याप्ता पूर्वा जयायुक्ता निषेधात् मुख्यकाले तस्याः प्रागेव समाप्तत्वात् । इतरकर्मणि शिवपूजाव्यतिरिक्तकर्मणि सा सपूर्वा पूर्वान्विता न कदापि परेत्यर्थः । सापि शुक्ला परा परान्विता युग्मवाक्यात् हि निश्चयं चतुर्दशीषु

माक्षिकस्यास्वादो मधुलेहनं नृणां कदापि हितकरो न ।

निष्पावांश्च मसूरकानथ फलं वृन्ताकसंज्ञं मधु ।

इति संग्रहश्लोकोक्तेः ।।१३४।।

चैत्र्यां सुराधिपतिमर्चय पूर्णिमायां
स्नाहि त्वमिज्यरविभौमसमन्वितायाम् ।
तत्राश्वमेधफलमाप्स्यसि माधवे तु
कृष्णाजिनं वितर वत्स तिथौ हिमांशोः ।।१३५।।

अथ पूर्णिमा निर्णीयते चैत्र्यामिति । वत्स हे पुत्र चैत्र्यां पूर्णिमायां सुराधिपतिमिन्द्रं अर्चय पूजय । इज्यरविभौम-समन्वितायां गुरुरविभौमान्यतमवारयुतायां सत्यां त्वं स्नाहि । किं फलमित्यत आह तत्र तस्यां अश्वमेधफलमाप्स्यसि । माधवे वैशाखे हिमांशोश्चन्द्रस्य तिथौ पूर्णिमायां तु कृष्णाजिनं वितर देहि ।

कृष्णाजिने तिला कृष्णा हिरण्यं मधु सर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ।।

इति विष्णुवचनात् ।

मन्दे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ।।

इति वचनात् ।।१३५।।

ज्यैष्ठ्यां विधेहि तिलदानमुपानहं च
छत्रस्य वाथ निशि भूतसमन्वितायाम् ।
सावित्रिका व्रतमथाङ्गनयान्तगायाम्
अह्नः शुचौ कृतमिहात्मज कोकिलाख्यम् ।।१३६।

ज्यैष्ठ्यामिति । ज्यैष्ठ्यां पूर्णिमायां तिलदानं कुरु ।

ज्येष्ठे मासि तिलान् दद्यात् पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ।।

इति वचनात् च पुन उपानहं छत्रस्य च दानं कुरु. ज्येष्ठि ज्येष्ठा युता चेत्स्यात् छत्रोपानत्प्रदानतः । नरो नराधिपत्य-माप्नोतीति अथानन्तरं भूतसमन्वितायां तस्यां पूर्णिमायां निशि रात्रौ अङ्गनया नार्या सावित्रिकाव्रतं कृतं क्रियते ।

ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तया व्रतं ।
चीर्णं पुरा भयाद् भक्त्या कथितं ते मया नृप ।।
भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तमम् ।।

इत्यादिवचनात्

रात्रावुपोषिता नारी विधिनानेन पूजयेत् ।

इति वचनात् । शुचौ आषाढे मासिदिवसान्तगायां सायं-कालव्यापित्यां कोकिलाख्यं व्रतं कृतं क्रियते तयेत्यन्वयः ।

आषाढे पौर्णमास्यां तु सन्ध्याकाले उपस्थिते ।
सङ्कल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्ययम् ।।
स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ।
भोक्षामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ।।

इति वचनात् ।।१३६।।

व्यासार्चने प्रथमयामगता परेयं
नोचेत्सुतादि सहिताथ नभस्यमुष्याम् ।
कुर्यादुपाकृतिविधिं यजुषामथर्चां
गोविन्दभेथ करभे विदधीत साम्नाम् ।। ।।१३७।।

व्यासार्चन इति । सुत हे पुत्र इयं आषाढी पूर्णिमा प्रथमयामगता प्रथमप्रहरव्यापिनी व्यासार्चने व्यास-पूजने परा परान्विता कार्येति शेषः ।

त्रिमुहूर्तादिकं ग्राह्यं पर्वक्षौरप्रमाणयोः

इति वचनात् चेत् यदि नो न परत्र त्रिमुहूर्तगापि न तदा आदिसहिता पूर्वान्विता तस्मादेव वचनात् अथानन्तरं नभसि श्रावणे अमुष्यां पूर्णिमायां यजुषामुपाकृतिविधिमुपाकर्म कुर्यात् ।

अथातः श्रावणे मासे श्रवणर्क्षयुते दिने ।
श्रावण्यां श्रावणे मासे पञ्चम्यां हस्तसंयुते ॥
दिवसे विदधीतैतदुपाकर्म यथोदितम् ।
अध्यायोपाकृतिं कुर्यात्तत्रोपासनवह्निना ।

इति वचनात् । अथानन्तरं ऋचां गोविन्दभे श्रवण-नक्षत्रे दिने कुर्यात् । अथानन्तरं करभे हस्तर्क्षदिने साम्नां विदधीत कुर्युः । पर्वणि याजुषा

वह्वृचा श्रवणे कुर्युः करभे सामगा जनाः ।

इति वचनात्

उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः ।
ग्रहसङ्क्रान्तियुक्तेषु हस्तश्रवणपर्वसु ॥

इति निषेधवचने यथासंख्यविज्ञानाच्च करभे हस्तयुत-पञ्चम्यां इत्यर्थः

तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥

इति वचनात् गोविन्दभे इति तद्युक्तायां पूर्णिमाया-मन्यस्यां वेत्यर्थः । श्रावण्यां श्रावणेऽपि चेति निषेधवचने श्रावणमासग्रहणात् ॥१३७॥

विश्वर्क्षभूतदिनसङ्क्रमणो परागै-
र्युक्ते न कार्यमथ वत्स परे निशीथात् ।

अन्त्यावुभौ यदि तदा तु भवेन्न दोषो
दुष्टे तु पर्वणि भुजङ्गतिथौ करर्क्षे ।।१३८।।

विश्व इति । वत्स हे पुत्र विश्वर्क्षभूतदिनसंक्रमणो परागैः उत्तराषाढा चतुर्दशी संक्रान्तिग्रहणैः युक्ते दिने न कार्यं

श्रवणेन तु यत्कर्म उत्तराषाढसंयुते
संवत्सर कृतोध्यायस्तत्क्षणादेव नश्यति ।
संप्राप्तवान् श्रुतिर्ब्रह्मा पर्वण्यौदयिके पुनः ।।
अतो भूतदिने तस्मिन्नोपाकरणमीष्यते
उपाकर्म नकुर्वन्ति क्रमात्सामर्ग्यजुर्विदः
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु ।

इत्यादिवचनदर्शनात् । अथानन्तरं अन्त्यौ उभौ संक्रमणो परागौ निशीथात्परे यदि स्यातामिति शेषः । तदा तु दोषो न भवेत्

अर्द्धरात्रादधस्ताच्चेत् संङक्रान्तिग्रहणं यदा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ।।

इति वचनात् । हस्तश्रवणपर्वसु इति विश्वर्क्षयुते श्रवणेन कार्यमित्यवगन्तव्यं ।

भूतयुक्ता निषेधस्तु परेद्युरपि पूर्णिमा ।

सत्वे पूर्वस्यां निषेध इत्यर्थः । पर्वणि दुष्टे तु भुजङ्गतिथौ करर्क्षे हस्तनक्षत्रयुतायां पञ्चम्यामित्यर्थः ।

संक्रान्तिग्रहणं वापि यदि पर्वणि जायते ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यत ।।

इति वचनात् पर्वणो मुख्यकालत्वात् पचम्यां संक्रान्तिदुष्टायां पर्वणि कार्यमिति तु नोक्तं मुख्यकाले दुष्टे सन्देहसम्भवात् दोषाभावे सन्देहाभावाच्च ।।१३८।।

पक्षे सिते नभसि भूततिथे क्षयश्चेत्
कुर्वन्त्युपाकरणमत्र दिने यजुर्ज्ञाः ।
पूर्णा क्षये सति रवेरुदयेपि तस्यां
नोपाकृतिं बुधवराः शुभदा वदन्ति ॥१३९॥

पक्ष इति । नभसि श्रावणे सिते शुक्लपक्षे भूततिथे चतुर्दश्याः क्षयः अवमः चतुर्दश्या त्रुटिरिति यावत्, चेद्यदि अस्ति अत्र यदा तदेति पदयोरर्थवशात् अध्याहारः । अत्र दिने भूत–तिथिक्षयदिने उदये चतुर्दशी सत्यपि यजुर्ज्ञाः यजुर्वेदविदः उपाकरणं उपाकर्म कुर्वन्ति अनुतिष्ठन्ति । पूर्णाक्षये पूर्णिमाक्षये सती तस्यां पूर्णिमायां रवे उदये उदयकाले सत्वेपि बुधवराः विद्वांसः तस्यामुदयकालमात्रव्यापिन्यां पूर्णिमाय ांउपाकृतिं उपाकर्म क्रियां शुभदां कल्याणदां न वदन्ति ॥१३६॥

योपाकृतौ स्मृतिषु भूततिथेर्विनिन्दा
सा पूर्णिमा स्तुतिकृते विबुधैः प्रदिष्टा ।
नन्दातिथेरिह कृता तु नितान्तनिन्दा
सा पूर्णिमोदय उपाकरणस्य निन्दा ॥१४०॥

येति । स्मृतिषु धर्मशास्त्रेषु उपाकृतौ उपाकरणकर्मविषये भूततिथेः चतुर्दश्या या स्मर्यमाणा विनिन्दा विशिष्ठा गर्हणा सा निन्दा पूर्णिसा स्तुतिकृते उपाकरणकर्मणि पौर्णमासी तिथिः प्रशस्तेति प्रतिपादयितुं बुधैर्विद्वद्भिः प्रदिष्टा उपदिष्टा । न तु चतुदर्श्यां उदये उपाकर्म न कार्यमिति प्रतिपादयितुं प्रदिष्टा । न हि निन्दा निन्दितुं प्रस्तूयते अपि तु विधेयं स्तोतुमिति न्यायात् । इह उपाकरणविषये नन्दातिथे प्रतिपदःकृता विहिता तुकारः पूर्वार्द्धार्थापेक्षया उत्तरार्द्धार्थे वैलक्ष्पण्यद्योतकः । या नितान्त

निन्दा सा पूर्णिमोदये उदयकाले पौर्णमास्याः सद्भावमाऽत्रेपि उपाकरणं कर्तव्यमिति उपाकरणस्य उपाकरणवादिनः निन्दा जुगुप्सा ।।१४०।।

तस्मात् सदैव सुत पञ्चदशी विवृद्धौ
शस्ता यजुर्ग्रहणकर्मणि पूर्वपूर्णा ।
वृद्धिं गता खलु चतुर्दशीका यदा स्यात्
तत्रोत्तरा तु गदिता शुभदा सुधीभिः ।।१४१।।

तस्मादिति । तस्मात् पूर्वोक्तशिष्टाचारपरम्परान्वयव्यतिरेकं स्तुतिनिन्दयोस्तात्पर्यं च विचार्य सुत हे पुत्र सदैव सर्वदैव पञ्चदश्या पूर्णिमाया विवृद्धौ वृद्धिसत्वे यजुर्ग्रहणकर्मणि यजुर्वेदोपाकरणे पूर्वपूर्णा प्रथमपूर्णिमा शस्ताः स्तुताः । पूर्वदिने एव उपाकरणं कर्तव्यमिति यावत् । यदा यस्मिन्काले तु चतुर्दशीका चतुर्दशी तिथि वृद्धिं गता वृद्धिं प्राप्ता तत्र तस्मिन् काले तु सुधिर्भिर्विद्वद्भिः किल निश्चयेन उत्तरा द्वितीया चतुर्दशी शुभदा उपाकरणकर्मणि कल्याणकारिणी गदिता कथिता अतो कदमरत्नोक्तिर्वाजसनेयिभिनादिरणीयाः ।।१४१।।

सस्योद्गमो न यदि तत्र तदा तु भाद्रे
कुर्वीत पर्वणि तदप्रतिसिद्धयोगे ।
उत्सर्जनं च तदनन्तरमाचरन्ति
पक्षानधीत्य नव वा मुनयस्तदन्ते ।१४२।

सस्येति । यदि तत्र नभस्थे पर्वणि श्रावणपौर्णमास्यां सस्योद्गम न तदा तु भाद्रे पर्वणि भाद्रपद पूर्णिमायाम् अप्रतिबिद्धयोगे भूतदिनादि वर्जिते न उपाकर्म कुर्वीत ।

अवृष्टचौपधयस्तस्मिन् मासे तु न भवन्ति चेत्
तदा भाद्रपदे मासि श्रवणेन तदिष्यतः ।

इति वचनात्

श्रावण्यां प्रौष्टपद्यां वा प्रतिपत् षड्मुहूर्त्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ।।

इति वचनाद्वा । तदनन्तरं उपाकर्मविधानानन्तरं मुनयस्तस्मिन्नेव दिने उत्सर्जनमाचरन्ति ।

पुष्ये तूत्सर्जनं कुर्यादुपाकर्म दिनेथवा ।

इति वचनात् । वा अथवा नवपक्षान् सार्धचतुर्मासानधीत्य तदन्ते आचरन्ति ।

पौषमासयरोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्युरुत्सर्गं विधिवद्बहि ।।

इति वचनात् । षौष्यां माघ्यां चोत्सृजेदिति सूत्रात् श्रावण्यां कुर्वाणः पौषे प्रौष्ठपद्यां माघे पौष्यामुत्सर्जनं कुर्यादिति अध्यायोत्सर्जनं माघ्यामिति च वचनात् तदन्ते नवपक्ष्यान्ते पौषस्य माघस्य वा शुक्लप्रतिपदि इत्यर्थः ।

माघे प्रौष्ठपदे वापि सिताद्यायां तदुत्सृजेत् ।

इति वचनात् । तदन्तरमिति प्रौष्ठपद्यां कुर्वाणोपि तस्मिन्नैव दिने इत्यर्थः ।

श्रावण्यां प्रौष्ठपद्यां वेत्यादि पूर्वोक्तवचनात् ।।१४२।।

पूर्वाह्ण एव समये विदधीत कर्म
दर्भैर्विधाय मुनिसप्तकमग्रतोऽर्चेत् ।
सन्तर्पयेच्च तदनन्तरमम्भसर्षीन्
देवांश्च भूसुरगणानपि भोजनेन ।।१४३।।

पूर्वाह्णेति । कर्मं तत् कर्मद्वयं पूर्वाह्ण एव समये विदधीत

भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु ।

इति वचनात् । पूर्वाह्णहेतुविसर्गः स्यादिति वचनाच्च । ततः

किमित्यत आह – दर्भैर्मुनिसप्तकं सप्तर्षिन्विधायाग्रतः अर्चेत् तदनन्तरं अम्भसा ऋषीन् सन्तर्पयेत् ।

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ।
ऋषीन् दर्भमयान्कृत्वा पूजयेत् तर्पयेत्ततः ।।

इति वचनात् यः देवांश्च तर्पयेद् ब्राह्मणानपि भोजनेन वा ब्राह्मणानपि भोजयेदित्यर्थः ।।१४३।।

रक्षाविधिं च विदधीत हि पूर्णिमायां
भद्रां विहाय परतः समयेऽपराह्णे ।
भाद्रे शुचौ नभसि वा सुत पूर्णिमाया-
मारोपयेदखिलनाकसदां पवित्रम् ।।१४४।।

रक्षाविधिमिति । हि निश्चयं पूर्णिमायामस्यां भद्रां परतो विहायापराह्णकाले रक्षाविधिं च विदधीत ।

ततोऽपराह्णसमये रक्षापोटलिकां शुभाम् ।
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैः । इति ।।
भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति राष्ट्रं दहति फाल्गुनी ।।

इति वचनात्

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः ।
कर्तव्यो रक्षिकाचारो द्विजान् सम्पूज्य शक्तितः ।

इति । सुत हे पुत्र शुचौ नभसि भाद्रे वा पूर्णिमायामखिलनाकसदां सर्वदेवानां पवित्रमारोपयेत् ।

शुचौ नभसि भाद्रे वा पूर्णिमायां नराधिप ।
पवित्रं सर्वदेबानां नित्यमारोपयेन्नरः ।।

इति वचनात् ।।१४४।।

भाद्रे निशाकरतिथौ व्रतमङ्गनाभिः
सावित्रमात्मज विधेयमभीष्टसिद्ध्यै ।
कृत्वा त्रिरात्रमुपवासमनङ्गतिथ्यां
नक्तादि सम्यगथवादिसमन्वितायाम् ॥१४५॥

भाद्र इति । आत्मज हे पुत्र भाद्रे भाद्रपदमासे आदि-समन्वितायां निशाकरतिथौ पूर्णिमायामङ्गनाभिः स्त्रीभिरभीष्ट-सिद्ध्यै सावित्रं व्रतं सावित्रिकाव्रतं विधेयम् ।

सावित्रीव्रतमन्तरेण भवतोमा पौर्णमास्यौ पर ।

इति दीपिकोक्तेः । अनङ्गतिथ्या त्रयोदश्याः तस्यामारभ्ये-त्यर्थः । त्रिरात्रं दिनत्रयं उपवासं कृत्वा अथवा नक्तादि सम्यक् विधायेत्यर्थः ।

त्रयोदश्यामथारभ्य दिनत्रयमुपोषिता ।
कृतनक्ताथवा कुर्यात्प्रौष्ठपद्यामिदं व्रतम् ॥

इति वचनात्

प्रौष्ठपद्यां विधातव्या सावित्रीव्रतमुत्तमं ।
दिनत्रयमुपोष्याथ कृत्वा नक्तमथापि च ॥

इति वचनाच्च ॥१४५॥

नान्दीमुखाश्च पितरः परितोषणीया
श्राद्धेन पिण्डसहितेन सुतेन भक्त्या ।
तस्यां तिथावथ विधेयमिषेन्दुतिथ्यां
व्यक्तं ब्रवीमि शृणु सम्प्रति शुद्धचेता ॥१४६॥

नान्दीमुखा इति । तस्यां प्रौष्ठपद्यां नान्दीमुखाः पितरश्च सुतेन पुत्रेण पिण्डसहितेन श्राद्धेन परितोषणीयाः ।

नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
प्रौष्ठपद्यां तु कर्त्तव्यं वराहवचनं यथा ॥

इति ब्राह्मात् ।

पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयित्वा प्रौष्ठपद्यां यथादर्शस्तथैव सा ।।

इति वचनाच्च । अथानन्तरं इषेन्दुतिथ्यां आश्विनपूर्णिमायां विधेयं कर्तुमर्हं कर्म व्यक्तं ब्रवीमि त्वं सम्प्रति शुद्धचेता एकाग्रचित्तः सन् श्रृणु ।।१४६।।

पूर्वाह्लगाश्वयुजि कर्मणि चाश्वयुज्याः
कार्याथ सा निगदिता सुत कौमुदीति ।
तस्यामुपोष्य कमलामथ शक्रमर्चे-
दक्षान् भजेत निशि जागरणं च कुर्यात् ।।१४७।।

पूर्वाह्लगेति । सुत हे पुत्र आश्वयुजि आश्विनमासे पूर्णिमा च आश्वयुज्या कर्मणि पूर्वाह्लगा पूर्वाह्लकालव्यापिनी कार्या पूर्णिमाश्वयुजि विधाविति वचनात् ।

शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते ।

इति शौनकोक्तेः । पूर्णिमायामिति तद्विधिविशेषो निर्णयसिन्धौ ज्ञेयः । अथानन्तरं सा पूर्णिमा कौमुदीति गदिता प्रोक्ता । तस्यामुपोष्य कमलां लक्ष्मीमर्चयेत् । अथानन्तरं शक्रं इन्द्रं अर्चेत् अक्षान् भजेत् तैः क्रीडेदित्यर्थः । निशि जागरणं च कुर्यात् ।

आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ।
कौमुदीति समाख्याता कार्या लोकैर्विभूतये ।।
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेष अक्षे जागरणं चरेत् ।।
निशीथे वरदा लक्ष्मी कोजागर्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ।।

इति वचनात् ।।१४७।।

ऊर्जे तु काम्यवृषमुत्सृज पूर्णिमायां
लोके शिवस्य यदि वत्स निवस्तुकामः।
द्वीशे रवौ हिमकरे दहनर्क्षयाते
योगस्तु पद्मक इति प्रथितोत्र शस्तः ॥१४८॥

ऊर्ज इति। वत्स हे पुत्र ऊर्जे कार्तिकमासे पूर्णिमायां शिवस्य लोके यदि निवस्तुकामस्तर्हि काम्यं वृषमुत्सृज।

कार्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत्।
शैवं पदमवाप्नोति।

इति वचनात् अत्र पूर्णिमायां द्वीशे विशाखानक्षत्रे रवौ हिमकरे चन्द्रे दहनर्क्षयाते कृत्तिकानक्षत्रं याते सति तु योगः पद्मक इति शस्तः प्रशस्तः प्रथितः।

विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमा।
सुयोगः पद्मको नाम पुष्करेष्वतिदुर्लभः॥

इति वचनात् ॥१४८॥

पूर्वाह्णगैव यदि सा दिवसद्वयेऽपि
कार्या निशीथरजनीमुखकालयाता।
गोविन्दपूजनविधौ शिवपूजने तु
कार्यारुणोदयगता विहितोपवासैः ॥१४९॥

पूर्वाह्णगेति। यदि सा पूर्णिमा दिवसद्वयेऽपि पूर्वाह्णगैव तदा गोविन्दपूजनविधौ विष्णुपूजनविधौ निशीथरजनीमुख-कालयाता निशीथप्रदोषयोरन्यतमकालव्यापिनी कार्या।

कार्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप।
सोपवासश्च सम्पूज्य हरिं रात्रौ जितेन्द्रियः॥

इति रात्रिकालविधानात् । शिवपूजने तु विहितोपवासैर्जनैररुणोदयगतारुणोदयकालव्यापिनी कार्या ।

वर्षे च हेमलम्बाख्ये मासे श्रीमति कार्तिके ।
शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति ॥
महादेवतिथौ ब्राह्मे मुहूर्त्ते मणिकर्णिके ।
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयेत् ॥

इति वचनात् ॥१४९॥

कार्या परा सुत जनैर्व्रतसाङ्गतायामूर्जेऽथ साधिकफलान्तकभत्रयाढ्या ।
मार्गे प्रदोषसमये जनि पूर्णिमाया-
मत्रेः सुतत्वमधिगत्य तदा परात्मा ॥१५०॥

कार्येति । सुत हे पुत्र अथानन्तरं ऊर्जे कार्तिके व्रत–साङ्गतायां कार्तिके व्रतोपद्यापने इत्यर्थः । परा कार्या अमा पौर्णमास्यौ परे इति दीपिकोक्तेः ।

अथोर्जव्रतिनः सम्यगुद्यापनविधिं श्रृणु ।
ऊर्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥

इत्यादि विधिर्निर्णयसिन्धौ ज्ञेयः । यद्यद् व्रतं क्रियते तस्य तस्य साङ्गता कार्येत्यर्थः । अथानन्तरं सा अन्तकभत्रयाढ्या भरणीकृत्तिकारोहिण्यन्यतमर्क्षयुताधिकफला भवति ।

यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित्
तिथिः सापि महापुण्या मुनिभिः परिकीर्तिता ॥
आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् ।
महती सा तिथि ज्ञेया स्नानदानेषु चोत्तमा ॥
प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्तिको प्रोक्ता देवानामपि दुर्लभा ॥

इत्यादि वचन दर्शनात् । मार्गे मार्गशीर्षेषु पूर्णिमायां प्रदोषसमये परात्मा परमात्मा अत्रेः सुतत्वं पुत्रत्वमधिगत्य प्राप्य तदाजनि दत्तात्रेयो जात इत्यर्थः ।

मार्गशीर्षे तथा मासि दशमेऽह्निमुनिर्मले ।
मृगशीर्षयुते पौर्णमास्यां ज्ञस्य च वासरे ॥
जनयामास देदीप्यमानं पुत्रं सतीश्वरं
तं विष्णुमगतं ज्ञात्वा अत्रिर्नामाऽऽकरोत् स्वयम् ।
दत्तवान् स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरः ॥

इति वचनात् ॥१५०॥

मेषे शनिर्यदि हरौ धिषणौषधीशौ ॥
भाष्वानपि श्रवणभे यदि सा तु माघी ॥
ख्याता महद्भिरुदिता महतीति नाम्ना
दानेऽधिका हि तिलकञ्चुककम्बलानाम्॥१५१॥

मेष इति । यदि मेषे शनिः हरौ सिंहे धिषणौषधीशौ गुरुचन्द्रौ यदि भास्वान् सूर्योपि श्रवणभे तन्नक्षत्रे भवति तदा सा माघे माघस्थिता पूर्णिमा नाम्ना महतीति ख्याता । महद्भिः तिलकंचुककम्वलानां दानेऽधिकाधिकफलप्रदा उदिता प्रोक्ता ।

मेषपृष्ठे यदा सौरिः सिंहे च गुरु चन्द्रमा ॥
भास्करः श्रवणर्क्षे च महामाघीति विश्रुता ॥
तिलपात्राणि देयानि कञ्चुका कम्वलास्तथा ।

इति वचनदर्शनात् ।

गुरुचन्द्रौ तथा सिंहे शनिर्मेषे रविः श्रुतौ ।
सा माघी महती ज्ञेया तस्यां दानात् सुखं लभेत् ॥

इति वचनाच्च ॥१५१॥

पूर्वाथवा परयुता सुत या प्रदोषे ।
होलाविधौ भवति फाल्गुनपौर्णमासी ।
सा पुण्यदा निगदिता दिवसद्वये तु
कार्या पराथ खलु विघ्नकरी सभद्रा ॥१५२॥

पूर्वेति । सुत हे पुत्र फाल्गुनपौर्णमासी पूर्वा पूर्वान्विता अथवा परयुता वाद्याप्रदोषे प्रदोषकालव्यापिनी भवति सा लोहाविधौ पुण्यदा निगदिता ।

प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा ।

इति वचनात्

श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वा विद्धा प्रकर्तव्या ॥

इति वचनाच्च पूर्वविद्धा मुख्या परविद्धा गौणी इति ज्ञेय मुख्यकालस्यासम्भवे गौणकालस्य ग्राह्यत्वात् पूर्वा परावेत्युक्तं दिवसद्वये तु दिवसद्वये प्रदोषव्यापिनी तु परा कार्या पूर्वदिने भद्रासत्वात् । अथान्तरं खलु निश्चयं सभद्रा भद्रान्विता लोहाविघ्नकरी भवति शेषः ।

भद्रायां दीपिता होला राष्ट्रभङ्गं करोति वै ।
नरस्य च नैव दृष्टा तस्मात्तां परिवर्जयेत् ॥
भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥

इत्यादि वचनदर्शनात् ॥१५२॥

पूर्वेद्युरस्ति न यदीन्दुतिथिः प्रदोषे
ग्रस्येत चेत्सुत परा तमसा तदा तु ।
कार्या परैव नहि सूतकमस्य कार्यं
होलाविधौ विकृतिमेत्यमुना न कालः ॥१५३॥

पूर्वेद्युरिति । सुत हे पुत्र यदीन्दुतिथिः पूर्णिमा पूर्वेद्युः प्रदोषे नास्ति चेत् यदि परा परेऽहनि प्रदोषे स्थिता सति तमसा राहुणा ग्रस्येत तदा तु परैव कार्या, पूर्वदिने भद्रासत्वात् भद्रायां होलाविधेर्निषेधात् कर्मकालव्याप्तेरभावाच्च । होलाविधौ अस्य ग्रस्यसूतकं नकार्यं तस्योत्तरविशेषत्वात् । अमुना सूतकेन कालः कर्मकाल विकृतिं न एति अन्यथा कर्मकालाभावे फलाभावात् कर्मणो यस्य यः तत्कालस्तत्कालव्यापिनी तिथिरिति वचनात् ।।१५३।

सावित्रिकाव्रतमृतेऽखिलपौर्णमासि
कार्या परैव नहि पूर्वयुता विधेया ।
नाक्षान्भजेत सुत कर्हिचिदेव तस्या–
मैषीं विनेति मुनिभिः स्फुटमुक्तमेव ।।१५४।।

सावित्रिकाव्रतमिति । सुत हे पुत्र अखिलपौर्णमासी सर्वा पूर्णिमा सावित्रिकाव्रतमृते विना परैव कार्या हि निश्चयं पूर्वयुता न विधेया

सावित्रिव्रतमन्तरेण भवतो मा पौर्णमास्यौ परे ।।

इति दीपिकोक्तेः तस्यां तिथौ ऐषीं आश्विनपौर्णमासीं विना अक्षान्न भजेत अक्षैर्न क्रीडेत् ।

निष्पावाँश्च मसूरकानथ फलं वृन्ताकसंज्ञं मधु।

द्यूतमिति संग्रहश्लोकोक्तेः ।।१५४।।

यामावसी नभसि मासिगता कुशानां
सा संग्रहे निगदिताथ महालयान्त्या ।
हस्तान्विता वसति भास्वति वत्स हस्ते
छाया गजस्य बहुतृप्तिकरी पितृणाम् ।।१५५।।

येति । या अमावासी नभसि श्रावणे मासि गता स्थिता सा कुशानां संग्रहे दर्भोच्चये निगदिता ।

मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः ।
आयातयामास्ते दर्भा विनियोज्या पुनः पुनः ।।

इति हारीतोक्तेः । अथानन्तरं महालयान्त्या भद्रामावास्या हस्ते भास्वती सूर्ये वसति हस्तान्विता सती गजस्य छाया

हंसे करस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ।।

इति वचनात् ।

अजेन सर्वलौहेन वर्षासु नियतव्रत ।
हस्तिछायासु विधिवत् कर्णव्यजनवीजितम् ।।

इति वचनात् श्राद्धं दद्यादिति शेषः ।।१५५।।

कृत्वा प्रभातसमये तनयाश्वयुज्या-
मभ्यञ्जनादि पितृयज्ञमपि प्रकुर्यात् ।
कृत्वा प्रदोषसमये सुत दीपमालां
लक्ष्मीं भजेद्यदुभयत्र तदा परस्याम् ।।१५६।।

कृत्वेति । तनय हे पुत्र आश्वयुज्यां आश्विनामावास्यायां प्रभातसमये प्रातःकाले अभ्यञ्जनादि तैलाभ्यङ्गादि आदिशब्दात् स्नानं तदुत्तरं च कर्म च कृत्वा पितृयज्ञमपि प्रकुर्यात् श्राद्धं च कुर्यादित्यर्थः ।

प्रत्युष आश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गल । इति ।
एवं प्रभातसमये त्वमावास्यां नराधिप ।
कृत्वा तु पार्वणश्राद्धम् ।

इत्यादिवचनात् । सुत हे पुत्र प्रदोषसमये दीपमालां कृत्वा लक्ष्मीं भजेत् पूजयेत् ।

दीपान् दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि ।
स्वलंकृतेन भोक्तव्यं सितवस्त्रोपशोभिता ।।

प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात् ।
दीपवृक्षाश्च दातव्याः शक्त्या देवालयेषु च ।।

इत्यादिवचनदर्शनात् यत् यदि उभयत्र दिनद्वये प्रदोषव्यापिनी तदा परस्यामेतत्कुर्यादित्यर्थः

दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि ।
तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका ।।

इति वचनात् ।।१५६।।

स्वातौ तमीशतपनौ यदि वत्स तस्यां
पञ्चत्वगम्बु कृतशौचविधिर्मनुष्य : ।
अभ्यङ्गपूर्वमबलां मधुकैटभारे –
र्नीराजयेत् प्रियफलेप्सुमनाः समर्च्य ।।१५७।।

स्वाताविति । वत्स हे तात यदि स्वातौ तमीशतपनौ चन्द्रसूर्यौ तस्यां स्वातिगतचन्द्रसूर्यायाममावास्यायां अभ्यङ्गपूर्वं कृताभ्यङ्गः सन् पञ्चत्वगम्बुकृतशौचविधिः पञ्चत्वगुदकस्नायी मनुष्यः प्रियफलेप्सुमना प्रियफलाहितचित्तः स न् मधुकैटभारेर्विष्णोरबलां भार्यां लक्ष्मीमित्यर्थः, समर्च्य नीराजयेत् ः

स्वातीतिथे रवाविन्दुर्यदि स्वाति गतो भवेत् ।
पञ्चत्वगुदकस्नायी कृताभ्यङ्गविधिर्नरः ।।
निराजितां महालक्ष्मोमर्चयन् श्रियमश्नुतः ।।

इति वचनात् ।।१५७।।

माघे यदा रविदिने श्रुतिपातयुक्तो
तस्यामुदीरित इति ग्रहकोटितुल्यः ।
अर्द्धोदयो मुनिभिरत्र समर्च्य भक्त्या ।।
देवत्रयं द्विजवराय धनं प्रदद्यात् ।।१५८।।

योगमाह माघीति । यदा रविदिने श्रुतिपातयुक्ता श्रवण व्यतिपातयुता माघी माघामावास्या भवेदिति शेषः । तदा तस्यां ग्रहकोटितुल्यस्तत्तुल्यफल अर्द्धोदय इति मुनिभिरुदीरितः प्रोक्तः ।

अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः ।
अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ।।

इति भारतोक्ते ।

माघामायां व्यतीपाते आदित्ये विष्णुदैवते ।
अर्द्धोदयं तदित्याहुः सहस्रार्कग्रहैः समा ।।

इति वचनाच्च । अनेन माघस्यैव ग्रहणात् पौषे योगे निरस्तः । अत्र भक्त्या देवत्रयं समर्च्य द्विजवराय ब्राह्मणोत्तमाय धनं दक्षिणां

दद्यात् विष्णुमहेशानां सौवर्णी पलसंख्यया ।
प्रतिमास्तु प्रकर्तव्यास्तदर्धेन द्विजोत्तम ।।

इति वचनात् ।।१५८।।

यामेन्दुवारसहितावनिजान्विता वा
गोलक्षदानफलदा जगतीह सर्वा ।
दस्त्रश्रुतीन्दु वसुनागशिवर्क्षयुक्ता
वारे रवेर्यदि तदा व्यतिपातयोगः
दाने जपे च हवने च समा नवानां
ख्यातो बुधैर्जगति कोटिगुणप्रदायी ।।१५९।।

योगान्तरमाह येति । इह या अमा अमावास्या इन्दुवारसहिता सोमवारान्विता वा अथवा अवनिजान्विता भौमवारयुता सर्वा द्वादशैव गोलक्षदानफलदा भवेत् ।

अमावासीन्दुवारेण रविवारेण सप्तमी

चतुर्थी भौमवारेण विषुवत्सदृशं फलम् ।

सिनीवाली कुहुर्वापि यदि सोमदिने भवेत् ।।

गोसहस्रफलं दद्यात्स्नानं वै मौनिना कृतम् ।इति।

अमावास्यां भवेद् वारो यदा भूमिसुतस्य वै ।

जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत् ।।

इत्यादिवचनात् । योगान्तरमाह— यदि सा अमा रवेर्वारे सतीदस्रश्रुतीन्दुवसुनागशिवर्क्षयुक्ता अश्विनी श्रवण मृग-शिरा धनिष्ठा अश्लेषाद्रान्यितमनक्षत्रयुता तदा व्यतिपातयोगः व्यतिपातनामा योगो भवति ।

श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तके ।

यद्यमा रविवारेण व्यतिपातः स उच्यते ।।

इति वचनात् । दाने च जपे च हवने च स योगो मानवानां कोटिगुणप्रदायिनी बुधैर्जगति ख्यातः ।

तत्र जप्तं हुतं दत्तं सर्वकोटिगुणं भवेत् ।

इति वचनात् ।।१५९।।

पूर्वान्वितामुपवसन्दिवसार्द्धतोऽर्वाक्
संधौ यजेत मनुजश्चरमादितिथ्योः ।
नो चेत् परेऽहनि सुताथ तृतीयभागः
व्याप्तास्वमासु विदधीत मखं पितृणाम् ।।१६०।।

इष्टिमाह पूर्वान्वितामिति । मनुजो मनुष्यः पूर्वान्वितां चतुर्दशीयुतामुपवसन् तस्यामुपोषणं कुर्वन् इत्यर्थः । दिवसार्द्धतः दिनार्द्धादर्वाक् पूर्णिमामावास्यान्यतमप्रतिपदो पूर्णिमा प्रतिपदोरमाप्रतिपदोश्च संधौ यस्यां दिनार्द्धादर्वाक् तयोः सन्धिस्तस्यामित्यर्थः, यजेत यज्ञं कुर्वीत पक्षान्ता उपवस्तव्या, पक्षादयोभियष्टव्या इति वचनात् ।

पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते
उपोष्य तत्र पूर्वेद्यु तदहर्याग इष्यते ।।

इति वचनाच्च

सन्धिश्चेत् संगवादूर्ध्वं प्राक् पर्यावर्तनाद्रवेः ।
सा पौर्णमासी विज्ञेया सद्यः कालविधौ नरैः ।।

इति वचनाच्च । चेद्यदि नो न एवं विधानेत्यर्थः । तदा परेहनि केवलायामपि प्रतिपदि कुर्यात् ।

अपराह्णेथवा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वो भूते याग ईष्यते ।।

इति मदनरत्ने वचनात् । सुत हे पुत्र अथानन्तरं तृतीय-भागव्याप्तासु अपराह्णव्यापिनीषु अमासु पितृणां मखं श्राद्धं विदधीत कुर्वीत ।

पिण्डान् न्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।
वासरस्य तृतीयांशे नातिसन्ध्या समीपत ।।

इति कात्यायनोक्तेः ।

दर्शश्राद्धं च यत्प्रोक्तं पार्वणं तत्प्रकीर्तितं ।
अपराह्णे पितृणां च तत्र दानं प्रशस्यते ।।

इति शातातपोक्तेश्च । यद्युभयेद्युरेषः विहितः सर्वापराह्ण स्मृत इति दीपिकोक्तेश्च अतः चतुर्दशीयुक्ते दर्शे पितृयज्ञे सति परदिने यागोर्थात् सिद्धः ।।१६०।।

चन्द्रग्रहे सति सुत प्रहरत्रयं प्राक्
सूर्यग्रहे तु चतुरः प्रहरान् मनुष्यः ।
ग्रस्तास्तगे तु परतोऽपि रवौ विधौ वा
ग्रस्तोदयेऽपि शशिनस्त्वखिलेऽह्नि नाद्यात् ।।१६१।।

अथ ग्रहणे कृत्यमाह । चन्द्रेति । सुत हे पुत्र चन्द्रग्रहे तद्ग्रहणे सति मनुष्यः प्राक् प्रहरत्रयं सूर्यग्रहे तु चतुरः प्रहरान्नाद्यात् ।

सूर्यग्रहे तु नाश्नीयात् पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामाँस्त्रीन् वालवृद्धातुरैर्विना ।।

इति गौतमोक्तेः रवौ विधौ वा ग्रस्तागते तु परतोपि परे रात्रौ दिनेपि नाद्यात्। रवे ग्रस्तास्ते परदिने नाद्यात् तावुद्दीश्चैनाद्यादित्यर्थः। अमुक्तयोरस्तंगयोरद्यादृष्ट्वा परेहनि

अहोरात्रे न भोक्तव्यं चन्द्रसूर्यग्रहो यदा ।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्या ततःपरम् ।।

इति वचनदर्शनात्। परतोपीति वचनात् पूर्वतस्त्रीन् चतुरो वा परतो दिनं रात्रिं वेति शशिनस्तु ग्रस्तोदयेपि अखिलेऽह्नि यामचतुष्टयात्मिकेऽहनि नाद्यात् ।

ग्रस्तोदयेः विधोः पूर्वं नाहर्भोजनमाचरेत् ।

इति वचनात् ।।१६१।।

बालादयः प्रहरमेव न भक्ष्यमद्यु-
स्तत्कालपक्वमितरत्र जनैर्न भोज्यम् ।
तक्रं पयोदधि न वर्जितमाज्यपक्वं
गाङ्गं जलं मुनिभिरात्मज दूष्यतेऽन्यत् ।।१६२।।

बालादय इति । आत्मज हे पुत्र बालादयो वालवृद्धातुराः प्रहरमेव भक्ष्यं नाद्युः ।

सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम् ।
अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे ।।

इति वचनात् । वालवृद्धातुरैर्विनेति पूर्वोक्तवचनाच्च । तत्कालपक्वग्रहणकालपक्वं तदन्तरितं वा इतरत्र पश्चाज्जनैर्न भोज्य ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ।।

इति हेमाद्रौ षट्त्रिंशन्मतात् ।

नवश्राद्धेषु यच्छिष्टं ग्रहपर्युषितं च यत् ।

इति मिताक्षरायां वचनाच्च । भक्ष्यमाह आत्मज हे पुत्र तक्रं पयो दुग्धं दधि आज्यपक्वं अपूपशष्कुल्यादि गांगं जलं पर्युषितं च मुनिभिर्न वर्जितं भोज्यमित्युक्तम् ।

आरनालं पयस्तक्रदधिस्नेहाज्यपाचितं ।
मणिकस्थोदकं चैव न दूष्येद्राहुसूतके ।।

इति वचनात् ।

वारितक्रारनालादि तिलदर्भौ न दूष्यत इति वचनात् ।

ग्रहोषितं जलं पित्वा पादकृच्छ्रं समाचरेत् ।

इत्युक्तेर्जलं गांगमित्युक्तं अन्यं दूष्यते अन्नपक्वमिह त्याज्यमित्यादि वचनात् । तक्रादीनामेव भोज्यत्वेन ग्रहणाच्च ।।१६२।।

कुर्यादुपोषणमनेहसि तद्ग्रहस्य
पुत्रीतरो न सुत पुत्रयुतो विदध्यात् ।
प्राक् स्नानमुक्तमथ होमसुरार्चनादि
मध्ये ततो द्रविणदानमतः सचैलम् ।।१६३।।

कुर्यादिति । सुत हे पुत्र पुत्रीतरः पुत्रहीनः तद्ग्रहस्य तयोर्ग्रहणस्यानेहसि काले चन्द्रसूर्यग्रहणकाले इत्यर्थः उपोषणं उपवासं कुर्यात् ।

एकरात्रमुपोष्यैव ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा दत्वा च विधिवन्मोदते विष्णुना मह ।।

इति लिंगपुराणात् पुत्रयुतो न विदध्यात् उपवासं न कुर्यात् ।

आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणं चोपवासं च न कुर्यात् पुत्रवान् गृही ।।

इति जैमिनीवचनेनोपवासनिषेधात् रवेर्ग्रस्तास्ते प्रहरद्वयं हित्वा रात्रौ बालादिवद्भोजनं अन्यथोपवासोपपत्ते सायाह्ने

ग्रहणं चेत्स्यादिति पूर्वोक्तवचनात् प्राक्स्पर्शे स्नानम् उक्तम् । अथानन्तरं मध्ये होमसुरार्चनादि आदिशब्दाज्जपश्च ततो मुच्यमाने द्रविणदानं अतो मुक्त्यानन्तरं सचैलं स्नानम् उक्तं ।

ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते: स्नानं विधीयते ।।

इति वचनात् ।

स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम् ।

इति ब्रह्मवैवर्ताच्च ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचैलं च भवेत्स्नानं सूतकान्नं विवर्जयेत् ।।

इति वृद्धवशिष्ठोक्तेश्च ।

मुक्तो यस्तु न कुर्वीत स्नानं ग्रहणसूतके ।
स सूतकी भवेत्तावद् यावत् स्यादपरो ग्रहः ।।

इति स्नानाकर्तु: दोषश्रवणाच्च ।।१६३।।

स्नायादुदन्वति सरित्यथवामराणां
तीर्थेऽथवेतरनदीषु सरोवरे वा ।
श्राद्धं च तत्र विदधीत सुतान्नहीनं
सन्देहमत्र न भजात्मज सूतकेऽपि ।।१६४।।

स्नायादिति । आत्मज हे पुत्र तत्र ग्रहणे उदन्वति समुद्रे स्नायात् । अथवा अमराणां सरिति गंगायां अथवा तीर्थे अथवा इतरनदीषु वा अथवा सरोवरे सरसि–

गंगास्नानं प्रकुर्वीत ग्रहणे चन्द्रसूर्ययोः ।
महानदीषु वान्यासु स्नानं कुर्याद् यथाविधिः ।।

इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं ततः ।
गंगातोये तु सम्प्राप्ते इन्दोः कोटि रवेर्दश ।।

गवां कोटिसहस्रस्य यत्फलं लभते नरः ।
तत्फलं लभते मर्त्यो ग्रहणे चन्द्रसूर्ययोः ॥
वापीकूपतडागेषु गिरिप्रस्रवणेषु च ।
नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि ॥
उष्णोदके न वा स्नायात् ग्रहणे चन्द्रसूर्ययोः ।

इत्यादिदर्शनात् ।

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकान् ।
भूमिस्थमुद्धतात् पुण्यं ततः प्रस्रवणोदकम् ॥
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्याम्बुपावनम् ॥
ततस्ततोपि गंगाम्भः पुण्यं पुण्यस्ततोम्बुधिः ।

इत्यादि मार्कण्डेयोक्तेः सुत हे पुत्र तत्र ग्रहणे अन्नहीनं आमान्नं श्राद्धं च विदधीत ।

चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् ।
तत्रैव सकला पृथ्वी दत्ता विप्रस्य वै करे ॥

इति वचनात् ।

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ।
आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा ॥

इति वचनाच्च । अत्र सूतके जननमरणसूतकेपि सन्देहं न भज संशयं मा कुरु ।

सूतके मृतके चैव न दोषो राहुदर्शने ।
तावदेव भवेत् शुद्धिर्यावन् मुक्तिर्न दृश्यते ॥

इति वचनात् ॥१६४॥

यस्य ग्रहो जननतस्तनयाष्टमान्त्य–
तूर्येषु राशिषु गते सति शीतभानौ ।
विद्येत स प्रथममेव नरोऽत्र शान्तिं
कुर्वीत दोषभयशङ्कितचित्तवृत्तिः ॥१६५॥

शान्तिमाह । यस्य यस्य जनस्य जननतोष्टमान्त्यतुर्येषु जननमाद्यराशिजन्मनक्षत्रं वा ततः प्रभृति अष्टमादि राशिषु शीतभानौ चन्द्रे गते सति ग्रहो ग्रहणं विद्येत स नरः प्रथममेवात्र ग्रहणे सति दोषभंयशकितचित्तवत्ति सन शान्ति कुर्वीत ।

तृषड्दशायोपगतं नराणां
शुभप्रदं स्याद् ग्रहणं रवीन्द्वोः ।
द्विसप्तनन्देषु सुमध्यमं स्यात्
शेषेष्वनिष्टं कथितं मुनीन्द्रैः ।।

इति ज्योतिषोक्तेः ।

तस्य दाने च होमं च देवार्चनजपौ तथा ।
उपरागाभिषेकं च कुर्यात् शान्तिर्भविष्यति ।।

इति वचनाच्च ।।१६५।।

पूर्णग्रहे चतुरहं त्र्यहमेव खण्डे
पूर्वं परत्र च तथा न हि कर्म कुर्यात् ।
दुष्टे फलं तमसि वत्स न जात्वदुष्टे
स्नानादिषु प्रणिगदन्ति बुधा मृशन्तः ।।१६६।।

सूतकमाह पूर्णग्रह इति । पूर्णग्रहे सर्वग्रासे पूर्वं चतुरहं परत्र तथा खण्डे ग्रहे पूर्व्वं त्र्यहं दिनत्रयं परत्र च तथा हि निश्चयं कर्म विवाहादिकार्यं न कुर्यात् ।

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम् ।
मांगल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ।। इति ।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः ।
द्वादश्यादि तृतीयान्तो वेदइन्दुग्रहे स्मृतः ।।

इति वचनात् । त्र्यहंखण्डग्रहे तयोरिति वचनात् बुधाः पण्डिताः मृशन्तो विचारयन्तः स्नानादिषु कर्मसु दृष्टे तमसि

ग्रहणे दृष्टे सति फलं प्रणिगदन्ति प्रवदन्ति । अदृष्टे न जातु कदाचित्

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्थानं न कुर्वीत दद्याद्दानं च न क्वचित् ।।

इति वचनात् । दृष्टोरिष्टप्रदो राहुरिति वचनात् । तेन मेघाच्छादने अन्धादेश्च न स्नानाद्यधिकारः ।।१६६।।

ज्येष्ठादिमाः शशभृतो यमशीतभान्वोः
कृष्णे सितुर्गिरिभुवो ह्यथ चण्डिकायाः।
विष्णवब्जयोरथ हरेर्द्युमणे रथान्त्ये
मार्गं विनेन्दुशिवयोस्तिथयो मनूनां ।।१६७।।

अथ मन्वादिराह ज्येष्ठादीति । शशभृतः चन्द्रस्य १५ यमशीतभान्वोः १०।१५ इशितुः कृष्णा ८ गिरिभुवः पार्वत्याः ३ अथानन्तरं चण्डिकायाः ९ विष्णवब्जयोः हरिचन्द्रयोः १२।१५ अथानन्तरं हरेः ११ द्युमणेः ७ अथानन्तरं अन्त्ये १५।३० इन्दुशिवयोः १५।३ मार्गशिरसंविना ज्येष्ठादारभ्येमास्तिथयो मनूनां मन्वादयो भवन्तीत्यर्थः । ज्येष्ठादारम्भाद् वैशाखे नास्तीति ज्ञेयं ।

तिथ्याग्नि न तिथिस्तिथ्याशेकृष्णे भावलो ग्रह ।
तिथ्यर्को नशिवो श्वोमा तिथिर्मन्वादयो मधोः ।।

इति दीपिकोक्तेः ।।१६७।।

ऊर्जाद्ययोः सितगते नवमी तृतीये
कृष्णे नभस्यतपसोः स्मरदेवपित्र्यम् ।
पूर्वाह्णगा युगभुवस्तिथयोऽपि शुक्लाः
कार्याश्च ता असितगा अपराह्णयाता ।।१६८।।

युगादिराह ऊर्जाद्ययोरिति । ऊर्जाद्ययोः कार्तिकवैशाखयोः सितगते शुक्लपक्षस्थे नवमीतृतीये यथासंख्येन नभस्यतपसोः भाद्रमाघयोः कृष्णे स्मरदैवपित्र्यौ त्रयोदश्यमावास्यौ यथासंख्येन एताश्चत्वारो युगभुवो युगादयः अपि शब्दात्ताः मन्वादयश्च तिथयः शुक्लाः सत्यः पूर्वाह्णगा पूर्वाह्णव्यापिन्यः असितगा कृष्णपक्षस्था अपराह्णयाता अपराह्णव्यापिन्यः दैवे कर्मणि चकारात् पित्र्ये कर्मणि च कार्या ।

पूर्वाह्णे तु सदा ग्राह्या शुक्ला मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका ॥

इति वाराहवचनात् ।

कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानां द्विसाहस्रं पितृणां तृप्तिदं भवेत् ॥

इति वचनात् ।

विषुवायनसंक्रातिमन्वादिषु युगादिषु
विहाय पिण्डं निर्वापं सर्वं श्राद्धं समाचरेत् ॥

इति वचनाच्च ।

या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
स्नात्वा दत्वा च हुत्वा च स्मृत्वानन्तफलं लभेत् ॥

इति वचनाच्च ॥१६८॥

अर्वाग्निशीथसमयाद्यदि संक्रमः स्यात्
पूर्वेऽह्नि पुण्यमुदितं परतः परेह्नि ।
आसन्नयामयुगमेव सुतात्र पुण्यं
मध्ये निशीथसमये तु दिनद्वयं स्यात् ॥१६९॥

अथ सक्रान्तिनिर्णयमाह । अर्वागिति सुत हे पुत्र यदि निशीथसमयादर्वाक् संक्रमः स्यात् यदा मेषसंक्रान्तौ घटिका ४०तदा पूर्वेह्नि पुण्यम् उदितं प्रोक्तं ।

पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः ।

प्राहुर्दिनद्वयं पुण्यमुक्त्वा मकरकर्कटौ ।।

इति दिनादर्धसमय एव संक्रमे दिनद्वये पुण्यतोक्तेः

अर्वाङनिशिथाद्यदि संक्रमः स्यात्

पूर्वेह्नि पुण्य परतः परेह्नि ।

इति संग्रहश्लोकोक्तेश्च परतः निशीथात् परसंक्रमे यथा ५० दण्डेषु संक्रान्तौ परेऽह्नि पुण्यस्तस्मादेव वचनात् अत्र संक्रान्तौ आसन्नयामयुगं सन्निहितप्रहरद्वयमेव पुण्यम् आसन्नयामद्वयमेव पुण्यमिति संग्रहश्लोकोक्तेः निशीथसमये मध्ये संक्रमे तु दिनद्वयं पुण्यं स्यात् । पूर्णे चेदर्धरात्रेत्वित्यादि पूर्वोक्तवचनात् । निशीथमध्ये तु दिनद्वयं स्यादिति संगृहश्लोकोक्तेश्च यथा ४५ दण्डे संक्रान्तौ दिनद्वयं पुण्यमिति तस्मात् मेषे ४५ संक्रान्तौ दिनद्वयं ५० संक्रान्तौ परेऽह्नि एतत्तु उपलक्षणमात्रं । निशीथाद्दण्डैकमात्रन्यूने ऽपि पूर्वे ऽह्नि दण्डैकमात्राधिके ऽपि परेह्नि इति दिनरात्रिप्रमाणतः सर्वत्र ज्ञेयम् ।।१६९।।

भास्वानुपैति मकरं तु यदि प्रदोषे

पुण्यं परे ऽहनि तदा मुनयो वदन्ति ।

कर्कं प्रयाति यदि वत्स विभातकाले

पूर्वे ऽह्नि पुण्यमिति च प्रथयन्ति सन्तः ।।१७०।।

भास्वानिति । यदि तु भास्वान् सूर्यः प्रदोषे प्रदोषसमये मकरम् उपैति यातिं तदा मुनयः परेऽहनि पुण्यं वदन्ति ऋषः प्रदोषे यदि वार्द्धरात्रे पुरेह्नि पुण्यमिति संगृहश्लोकोक्तेः मुक्त्वा मकरकर्कटौ इति निशीथनिर्णये प्रतिषेधात् वत्स हे पुत्र यदि विभातकाले प्रातः काले घटिकस्थापनादर्वाक् कर्कं प्रयाति गच्छति तदा सन्तो मनीषिणः पूर्वेह्नि पुण्यमिति च प्रथयन्ति आज्ञां प्रचलयन्ति । अथ कर्कटश्चेत् प्रभातकाले यदि वार्द्धरात्रे पूर्वेऽह्नि पुण्यं त्विति माधवार्या इति संगृहश्लोकोक्तेः ।

अर्द्धरात्रे तदूर्ध्वाच्च संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ।। इति

मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः ।
